SRI

UDAYANA CHARITAM

AN EASY SANSKRIT PROSE
FOR BEGINNERS

BY

Pandit. V. Anantacharya,

Sanskrit Pandit,

Pachaiyappa's College, MADRAS.

PUBLISHED BY

SIMHAM & CO.,

Paper Merchants,

69, Mahaperumall Street,

G. T. Madras.

1924.

All rights reserved.] [Price As. 10.

श्रीः

उदयनचरितम्

बृहत्कथा नायकस्य उदयनस्य
संक्षेपेण चरित्रप्रतिपादकम् ।

चेन्नपुरी पच्चयप्प कलाशाला संस्कृताध्यापकेन
पण्डित. वे. अनन्ताचार्येण,
ग्रथितम् ।

चेन्नपुरी,
हिन्दी प्रचार मुद्राक्षरशालायां मुद्रितम्

१९२४

मूल्यम्, रू. ०—१०—०.

श्रीः

उपोद्घातः ।

संस्कृतभाषामयानां गद्यकाव्यानां वैरल्यं बहोः कालात् आरभ्य अनुभूयते । यद्यपि इमां न्यूनतां परिहर्तुम् कतिचन कवयः प्रयतितवन्तः दृश्यन्ते । तथापि बहुभिः पुरुषायुषैरपि दुर्दर्शात्रसानेषु अतिविस्तृतेषु पद्यमयेषु वाङ्मयेषु मध्ये गद्यकाव्यानि समुद्रे घनसार-निकषतुल्यां दशाम् अनुभवन्ति । प्रत्यक्षितसारस्वतसारैः पूर्वैः महा कविभिः उदामितं अस्मिन् वस्तुनि प्रवृत्तोहम् वैनतेयमनुरोद्धुम् उद्युञ्जन् वायमइव अपहास्योपि "सर्वथा व्यवहर्तव्यं कुतोह्यवचनीयता" इति भवभूतिप्रदर्शितं धैर्यम् अवलम्ब्य इदंग्रन्थग्रथने प्रावर्तिषि ।

यदा कथासरित्सागरग्रन्थः प्रथमं मया पठितः तदानीमेव एतादृशाम्य ग्रन्थस्य आवश्यकता मम मनसि समुत्पन्ना । तथाप्ययं मनोरथः बहुभिः प्रत्यूहैः प्रतिहतः बहोः कालात् परमेव फलं प्रदर्शितवा-नित्यत्र भवितव्यतैव कारणीभवितुमीष्टे । अल्पमतिना मया निबद्धोयं ग्रन्थः दोषबहुलत्वेपि प्रतिपाद्ये महापुरुषवस्तुनि बहुमानेन सर्वैरपि सहृदयैः सादरं परिगृह्येत इति प्रत्येमि ।

"उदयनकथाकोविद ग्रामवृद्धान्" इति कालिदासीयेन पद्येन अस्याः कथायाः पूर्वं प्रचारबाहुल्यं बहुमान्यत्वञ्च आसीदिति ज्ञायते।

अतिप्रसिद्धैः प्रायेण अममन्तैश्च पदैः गुंफिततया व्युत्पित्सूनाम् अत्यन्तम् उपयुक्तः भविष्यति अयं ग्रन्थः इति प्रणेतुः संभावना ॥

इति,

मद्रास.
२१—१२—२४

वे. अनन्ताचार्यः

शुद्धिपत्रिका ।

पृष्ठं	पंक्ति	अशुद्धं	शुद्धं
1	8	विष्णुमी त	विष्णुमतो तं
,,	13	शातानीकम्	शतानीकम्
2	3	दुखम्	दुःखम्
,,	13	म कं	ममैकं
,,	16	हृदयो	हृदयो
3	6	युवयोः	युवयोः
3	9	ज्यौति षकेन	ज्यौतिषिकेन
4	7	योगमहिग्ना	योगमहिम्ना
,,	16	पूर्वोक्तिम्	पूर्वोक्तिम
5	17	तत	ततः
,,	21	तत	तत्
6	9	उदयन	उदयनः
8	11	एव	एवं
,,	14	रुमण्वान्	रुमण्वान्
11	9	धैर्यै	धैर्यै
15	3	अप्रधृष्यः	अप्रधृष्यः
16	4	श्रुत्वैतत्	श्रुत्वैतत्
20	10	तैः	तैः
21	18	निर्गच्छ	निर्गच्छ
22	2	कर्तव्यानि	कर्तव्यानि
,,	5	निश्चितवान	निश्चितवान्
,,	6	खस्य	स्वस्य
,,	17	चतुर्णा	चतुर्णां
25	9	पूवमेव	पूर्वमेव
26	11	आजहः	आजहुः
,,	12	सुहृद्भि	सुहृद्भिः

पुटं	पंक्ति	अशुद्धं	शुद्धं
39	9	" हे	" हे
41	5	तातमू	तातम्
,,	6	वाम्वदत्तायाम	वासवदत्तायाम्
43	11	पत्यु	पत्युः
48	15	अचिरात	अचिरात्
49	8	बन्धवः	बन्धवः
50	14	तस्मिनं	तस्मिन्
53	15	सिंहासनम	सिंहासनम्
54	7	ब्गसनी	व्यसनी
55	9	महेश्वर	महेश्वरः
56	2	वलत्रयञ्च	वलित्रयञ्च
62	17	नगरात	नगरात्
65	12	श्रुत्वा	श्रुत्वा
67	15	तव	नव
67	21	प्रत्यूह	प्रत्यूहः
68	18	तद्गतं	तद्गतं
69	15	कलिङ्गसेना	कलिङ्गसेना
70	3	दृष्ट्रा	दृष्ट्वा
72	9	कलिङ्गसेने	कलिङ्गसेने
,,	,,	विद्याधरण	विद्याधरेण
,,	18	तस्या	तस्याः
75	5	मम्	माम्
,,	18	द्वर्भिक्ष	दुर्भिक्ष
77	9	वत्सगज	वत्सराजः
,,	18	वसवदत्ता	वासवदत्ता
,,	22	काल्हाल्हं	कोलाहलं

॥ श्रीरस्तु ॥

उदयनचरितम् ।

अस्ति वत्सो नाम जनपदः, तत्र च कौशाम्बी नाम नगरी । तस्यां शतानीको नाम राजा बभूव । स पाण्डवानां वंशे जातः । जनमेजयस्य पुत्रः । परीक्षित पौत्रः । अभिमन्योः प्रपौत्रः । सः यौवने वयसि विष्णुमतीं नाम कन्याम् उपयेमे ।

स च एकदा मृगयार्थं वनं जगाम । तत्र तस्य शाण्डिल्यमुनिना सह परिचयः संजातः । तञ्च महर्षिं पुत्रोत्पत्तिम् अर्थयामास । स च शतानीकेन सह कौशाम्बीम् आगत्य पुत्रकामेष्टिम् अकारयत् । तत्र मन्त्रपूतं चरुं 'भार्यां प्राशय' इति राज्ञे प्रादात । विष्णुमती तं चरुं प्राश्य गर्भं दधौ । दशमे मासि पुत्रमेकम् असूत । तस्य च राजा "सहस्रानीकः" इति नाम चक्कार । ततः क्रमेण सहस्रानीको बाल्यम् अतीत्य युवराजः बभूव ।

तदानीं, देवलोके देवानामसुराणां च युद्धं समभवत् । तत्र देवेन्द्रः साहाय्यकरणाय शातानीकम् आमन्त्रयामास । शतानीकः राज्यभारं युगन्धरनाम्नि मन्त्रिणि निक्षिप्य देवलोकं जगाम । तत्र

यमदंष्ट्राभृतिभि असुरै सह युध्वा तैः निहतो बभूव। देवेन्द्रस्य सारथि मातलिः शतानीकस्य कळेवरं रथमारोप्य कौशाम्बीनगरम् आनिनाय विष्णुमती दारुणं तद दुःखम् असहमाना भर्तुः चिताम् आरुह्य अनुममार। सहस्रानीकस्तु पितुः और्द्धदेहिकानि निर्वर्त्य पित्र्यं सिंहासनम् आरोह।

अत्रान्तरे देवासुरयुद्धे देवेन्द्रो जयमवाप। ततः सुहृदः कुमारं सहस्रानीकम् आनाय्य बहुधा उपचचार। तत्र च कथाप्रसङ्गे एवमुवाच। 'अयोध्यायां कृतवर्मा नाम राजास्ति। तस्य मृगावती नाम कन्यारत्नमस्ति। सा तव भार्या भविष्यति' इति। श्रुत्वैतत् सहस्रानीकः सद्य एव मृगावत्याम् अतिमात्रम् अनुरक्तः आसीत्। ततश्च देवेन्द्रम् आमन्त्र्य तस्यैव रथमारुह्य कौशाम्बीं प्रति प्रतस्थे। मृगावतीमेव मनसा ध्यायन्तं सहस्रानीकं मध्येमार्गं तिलोत्तमा दृष्ट्वा एवमब्रवीत्। "राजन् क्षणं स्थीयतां, मदीयं वचनं श्रुत्वा ततो यास्यसि" इति। सहस्रानीकः तद्वाक्यं न शुश्राव। तेन कुपिता तिलोत्तमा सहस्रानीकमेवमशपत्। 'यस्याम् अनुरागेण आक्षिप्तहृदयो मद्वाक्यम् उपेक्ष्य सरभसं गच्छसि, तस्याः चतुर्दश समाः वियोगम् अनुभविष्यसि" इति। शापमिमम् अन्यमनस्को राजा न शुश्राव। देवेन्द्रसारथिः मातलिस्तु शुश्राव।

सहस्रानीकः कौशाम्बीमागत्य सर्वं स्वर्गलोकवृत्तान्तं मन्त्रिभ्यो निवेदयामास। ततश्च अयोध्याधिपतये कृतवर्मणे दूतं विससर्ज।

कृतवर्मा तु सहस्रानीकस्य मृगावत्याम् अनुरागं महिष्यै निवेदयामास। सात्वेवमब्रवीत्। देव अनुरूपमेव मृगावतीसहस्रानीकयोः दाम्पत्यम् शीघ्रमेवानयोः परिणयो भविष्यति, इममेवार्थम् एकदा कश्चित् ब्राह्मणः स्वप्ने समागत्य माम् अबबोधितवान् इति., एवं महिष्याः वचनम् आकर्ण्य हृष्टः कृतवर्मा दूतमुखेन एवं प्रतिसन्दिदेश 'मम कुमारी मृगावती पूर्वमेव भवन्तम अनुरक्ता। कृतार्थोऽस्मि इदानीं युवयोः तुल्यानुरागश्रवणेन, तद् विनैव कालविलम्बम् आगत्य निर्वर्त्यतां विवाहविधिः' इति।

अथ सहस्रानीकः दूतमुखात् एतदाकर्ण्य [illegible] निर्दिष्टे शुभे मुहूर्ते प्रस्थाय अयोध्यामाजगाम। तत्रैव दिवसान्यन्तीं मृगावतीमुपयेमे। तदानीं विद्याविनययोरिव मृगावतीसहस्रानीकयोः समागमः सर्वैः अभिनन्दितः आसीत्। तत [illegible] मृगावतीमादाय स्वराजधानीं कौशाम्बीमागत्य तया [illegible] रममाणः कञ्चित् कालं सुखमयापयत्।

अत्रान्तरे सहस्रानीकस्य मन्त्रिषु युगन्धरस्य 'यौगन्धरायणः' इति पुत्रः समजातः। सुप्रतीकनाम्नः सेनापतेः 'भगवान्' इति तनयः जज्ञे। नर्मसचिवस्य 'वसन्तकः' इति पुत्रः बभूव।

अथ कतिपये काले व्यतीते मृगावती गर्भं दधौ। तस्याः मुखं पाण्डुरम् अभूत्। मध्यं स्थूलम् अभूत्। एकदा सा भर्तारम् आगत्य दोहदम् एवं शशंस। 'नाथ रुधिरपूर्णायां वाप्यां स्नातुम्

इच्छामि' इति पश्चाच्चिक जीवहिंसां कर्तुमनिच्छन् महस्वानीक लाक्षादिभि लोहितवर्णं रक्त आप्लुतां वारि एतां निर्माय तस्यै प्रादर्शयत्। सा च तस्यां पक्षी. स्वार्थोन्मत्तया मृगावत्या लाक्षा-दिरक्तितो हृद मांसपिण्डमिव आत्मानौ। तदानीम आकाशे संचरन् तान् दृष्ट्वा 'मांसपिण्डम इदम' इति बुध्या तुण्डेनादाय उड्डिये। तद् दृष्ट्वा राजा दुःखसागरे निमग्नः मूर्च्छितः पपात। तत्र तदानिम अवन्त्याम योगमहिम्ना अवगत्य मातलिः स्वर्गलोकात् अवतीर्य राजानम एवम आश्वासयत्; 'राजन्! पुरा त्वयि स्वर्गलोकाद् भूलोकम आगच्छति सति, तिलोत्तमा त्वां ददर्श। त्वया सह यत्किञ्चित् सल्लपितुम इच्छन्तीम ताम अनादृत्य मृगावत्याम आसक्तहृदय सम्भ्रमम आगतवानसि। तेन कुपिता सा त्वाम अशपत्। तेन इदं वियोगदुःखम आपतितम। चतुर्दश संवत्सरान् वियोगम अनुभूय ततःपरं मृगावत्या सह सङ्गम्यसे' इति।

इत्येवं मातलिना समाश्वस्तः महस्वानीकः, कथंकथमपि मृगावतीवियोगं सहमानः "एति जीवन्तमानन्दो नरं वर्षशतादपि" इति पूर्वोक्तम अनुस्मृत्य धैर्यतया प्राणान् दधार।

मृगावतीं तुण्डेन आदाय उड्डीनः गरुडः आकाशे आमः, 'नेदं मांसपिण्डम, अपि तु सप्राणा मानुषी' इति विज्ञाय. ताम उदारचरित्रस्य अचिन्त्यकार्यां विमार्ज। पक्षितुण्डात् विनिर्मुक्ता सा मृगावती आत्मानम असहायां गिरिदुर्गम्यां अवलोक्य भीतभीता मुक्तकण्ठम् आचक्रन्द। तदानीं

चिराय क्षुधितः कश्चित् महान् अजगरः तां ग्रसितुम् आरेभे तत्र यदृच्छया समागतः कश्चित् पुरुषः तम् अजगरं बाणैः निहत्य मृगावतीं ररक्ष। ततः सा तादृशं दुःखम् असहमाना प्राणत्यागः एव वरम् इति तत्र सर्वज्ञशरणागतिः कस्यचित् मतगजस्य पुरतः गत्वा अतिष्ठत्। सः गजः ताम् एकाकिनीम् अबलां दृष्ट्वा दयालुः इव भूत्वा तां करेणुः मृदु पस्पर्श।

ततः सा मृगावती गर्भभरेण श्रान्ता, तत्रत्यं गिरिव्रजस्य समीपं गत्वा दुःखेन भ्रमन् आगच्छत् तत्र नातिदूरे चलमानात् आश्रमात् आगतः कश्चन तापसकुमारः तां ददर्श। सः तस्याः दुःखकारणं श्रुत्वा ताम् अनाथां दृष्ट्वा महर्षेः जमदग्नेः आश्रमं निनाय। पूर्णेन गर्भभरेण परिश्रान्ता अश्रान्ता सा मृगावती ब्रह्मवर्चसेन अग्निमिव विभ्राजमानं तं महानुभावं महर्षिं पादयोः प्रणमत्। सः महर्षिः तस्याः दुःखकारणं प्रणिधानेन परिज्ञाय नाम एवं सान्त्वयामास। वत्से! मा शुचः, कञ्चित्कालम् अत्रैवाश्रमे वसेः। सर्वलक्षणसंपन्नः कुमारस्ते जनिष्यते। अचिरेणैव कालेन भर्तुः समीपं यास्यसि इति। मृगावती च तद्वाक्यं श्रुत्वा प्रतिगृह्य तस्मिन्नेव आश्रमे उवास। तत पूर्णे प्रसवसमये चक्रवर्तिलक्षणोपेतं पुत्रम् एकम् असूत। तस्य जननसमये आकाशे अशरीरिणी वाक् एवम् उच्चचार। 'भद्रे मृगावति! उदयनो नाम तवायम् आत्मज समुत्पन्न अस्य तु कुमारः सर्वलोकविख्यातः विद्याधरचक्रवर्ती भविष्यति इति'। तत श्रुत्वा मृगावती परमम् आनन्दम् आश्चर्यं च अवाप।

इति प्रथमः उच्छ्वासः

द्वितीयः उच्छ्वासः ।

अथ महर्षिः जमदग्निः तस्य कुमारस्य जातकर्मप्रभृतीः सकलाः क्रियाः तत्तत्काले चकार । कुमारः उदयनोऽपि वयस्यैः मुनिकुमारकैः सह बालजनोचिताभिः क्रीडाभिः विहरन् क्रमेण शैशवम् अतिचक्राम । तदनन्तं महर्षिणैवोपनीतः तस्मादेव सर्वाः विद्याः जग्राह । क्रमेण चतुर्दशसु विद्यासु धनुर्विद्यासु च पारंगतो बभूव । एकदा मृगावती पूर्णचन्द्रमिव नयनानन्दकरं कुमारम् आलोक्य वात्सल्यनिर्भरहृदया स्वहस्तधृतं सहस्रानीकनामाङ्कं बालं तस्य हस्ते आमुक्तवती ।

ततः कदाचित् उदयन मृगयायै वनेषु विचरन् सर्पम् एकं बलात् आकर्षन्तं कञ्चन पुरुषम् अपश्यत् । सर्पस्य दुर्दशां ताम् अभिवीक्ष्य दयालुः अयम् उदयनः व्याधम् अवलोक्य एवम् अवादीत् । 'किमेनम् अनपराधिनं सर्पं पीडयसि ?; मुच्यताम् अयं, यथेच्छं गच्छतु' इति । स व्याधः एवं प्रत्यभाणीत् ; 'कुमार ! अहं दरिद्रः, इयमेव मम जीविका; मन्त्रबलेन ओषधिबलेन च अस्मिन् प्रदेशे सर्पः दुर्लभः आसीत् । चिरेण अयम् अन्विष्य समासादितः ; तत् इमं विसृज्य कथं जीविष्यामि' इति । एतत् श्रुत्वा उदारस्वभावः उदयनः मात्रा दत्तं कटकं हस्तात् उन्मुच्य व्याधाय दत्त्वा 'अनेन कटकेन जीविकां कुरु, मुञ्च एनम्' इत्युवाच । व्याधश्च कटकं लब्ध्वा परितुष्टः सर्पं विसृज्य कुमारस्य औदार्येण विस्मयम् आपन्नः यथेच्छं जगाम ।

'ततः सः सर्पः उदयनं प्रणम्य मनुष्यवाचा एवम् उवाच । कुमार ! अहं वासुकेः भ्राता वसुनेमिर्नाम । मयि घोषवती नाम वीणा अस्ति । तां प्रतिगृह्णीष्व' इति । उदयनः तथेति उक्त्वा तां प्रतिजग्राह । वसुनेमिः उदयनम् आमन्त्र्य स्वावासं ययौ । उदयनस्तु मातुः अन्तिकं गत्वा सर्वम् इमम् वृत्तान्तम् आवेदयामास; मृगावती बाल्येऽपि तस्य सहजम् औदार्यम् अभिननन्द ॥

अथ व्याधः तत् कटकं विक्रेतुं कौशाम्बीं जगाम । तत्र सहस्रानीकनामाङ्कं तत् कटकं दृष्ट्वा राजकीयाः पुरुषाः व्याधं तं राज्ञः समीपम् आनिन्युः । राज्ञा 'कथं त्वया कटकम् लब्धम्' ? इति पृष्टः व्याधः यथावृत्तं सर्वम् आचख्यौ । तदानीम अशरीरिणी वाक् एवम् अश्रूयत । 'राजन् ! तव शापस्य विमोचनकालः सन्निहितः । तव महिषी मृगावती उदयगिरिकानने महर्षेः जमदग्नेः आश्रमे चतुर्दशवयस्केन तव आत्मजेन सह सुखं निवसति' इति। तदाकर्ण्य सहस्रानीकः मयूर इव मेघनादं श्रुत्वा नितरां हृष्टो बभूव ।

अथ सद्य एव सैन्यैः सह प्रस्थाय तेनैव शबरेण प्रदर्शितमार्गः उदयपर्वतं ययौ । आश्रमस्य पीडा मा भूत् इति सैन्यानि दूरत एव स्थापयित्वा स्वयम् एक एव आश्रमान्तः प्रविश्य महर्षिम् जमदग्निं दृष्ट्वा प्रणनाम । स महर्षिः राजानं प्रत्यभिवाद्य कुशलं पप्रच्छ । ततः पुत्रेण सह मृगावतीम् अर्चयामास । तां दृष्ट्वा सहस्रानीकः महान्तम्

आनन्दम अध्यगच्छत् । एतावता कालेन अदृष्टम आत्मनं मरुभूमम् आकृष्य उपगूह्य मूर्ध्न उपाघ्राय पुलकितगात्र आनन्दसमुद्र-निमग्न बभूव । ततो महर्षिम् आमन्त्र्य मृगावत्या उदयनेन च समं कौशाम्बीं प्रति प्रतस्थे । चतुर्दशसु वत्सरेषु आत्मना अनुभूताम् अवस्थां प्रियायै निवेदयन् तरीयाम् अवस्थां च उपश्रृण्वन् सुदूरम अध्वानम् अज्ञातमेव अतिलङ्घयामास ।

तदानीं कौशाम्बीनगरवासिनो जनाः तोरणादिभिः नगरीम् अलंचक्रुः । प्रतिवीथि सिषिचुः । चन्दनागरुधूपैः सर्वतः अधि-वासयामासुः; प्रतिगृहद्वारं पूर्णकुम्भान् स्थापयामासुः; नानाविधानि वाद्यानि वादयामासुः; स्वस्तिवाचनिकान् ब्राह्मणान् पुरस्कृत्य सर्वे मन्त्रिणः पौराश्च तं प्रत्युज्जग्मुः । एवं सकुतूहलैः पौरैः अभिनन्द्यमानः सहस्रानीकः सह कुमारेण सह महिष्या च नगरं प्रविश्य स्वम्य प्रासादम् आससाद । ततः क्रमेण यौवने वयसि वर्तमानः उदयनः युवराजः बभूव । तस्य यौगन्धरायणः, रुमण्वान्, वसन्तकः, इति त्रयः मन्त्रिणः बभूवुः । ततः प्रजापालने प्रवीणं कुमारम् आलोक्य सहस्रानीकः तस्मिन्नेव समग्रम् राज्यभारं निक्षिप्य मृगावत्या सह तपसे हिमाद्रिं ययौ ।

इति द्वितीयः उच्छ्वासः ।

उदयनचरितम् ।

तृतीय उच्छ्वासः ।

अथोदयनः पित्र्यं सिंहासनमारुह्य नीतिमार्गमनतिलङ्घ्य प्रजाः परिपालयामास । प्रजाश्च तस्मिन् पितरीव स्नेहमाबबन्धुः । एवं चिरकाले व्यतीते यौगन्धरायणाद्येषु मन्त्रिषु राज्यभारं निक्षिप्य सुखमुवास । वसुनेमिना दत्तां घोषवतीं नाम वीणां सदा वादयामास । वनेषु मृगयां कर्तुं भृशं कुतूहली बभूव । घोषवतीनादश्रवणेन समाकृष्टान् वनमतङ्गजान् ग्राहयामास । एवं बहुविधैर्विहरणैः मनो विनोदयन् वत्सराजः कदाचिदेवं मनसि चिन्तयामास , एतावता कालेन ममानुरूपा भार्या न लब्धा । वासवदत्ता केवलं कुलेन शीलेन रूपेण वयसा च मम सदृशी श्रूयते । सा च मम विपक्षस्य उज्जयिनीनगराधिपस्य चण्डमहासेनस्य दुहिता । अतः सा कथमवाप्तुं शक्यत इति । तदानीमेव चण्डमहासेनोऽप्येवमकरोन्मनसि—वासवदत्ता मम दुहिता यौवने वयसि वर्तते । वत्सराजादृते नान्यो वरस्तस्याः सदृशो दृश्यते । स तु मम प्रतिपक्षः कथं मम सम्बन्धमङ्गीकुर्यात् । किञ्चायं मानधनः महाशूरो लोभादिभिर्दोषैः किञ्चिदप्यस्पृष्टः पौरैरमात्यैश्च भृशमनुरक्तश्च । तदेनं सामदानादिभिर्वशीकर्तुं न शक्यम् । किमिदानीं कर्तव्यमिति । सुचिरं विचार्यान्तत एवं निश्चयमकरोत्—'वत्सराजो मृगयाव्यसनी सन्ततमेकाकी वने भ्राम्यति, विशेषतो वनमातङ्गान् गृहीतुं कुतू-

[illegible] दृश्यते। तदेनं यन्त्रमतङ्गजेन वशीकरिष्यामि। अथ च तस्मिन् गान्धर्वविद्यामध्येतुं दुहितरं वासवदत्तां नियोक्ष्यामि; ततः स तन्त्रामनुरक्तो भविष्यति। उदयनं जामातरं कर्तुमिममन्तरा नान्य उपायोऽस्तीति।

[illegible] निश्चित्य चण्डमहासेनः चण्डिकालयं गत्वा देवीं प्रणम्य समाहितेनं पृच्छितुं प्रसीदेत्यभ्यर्थयामास। तदानीमशरीरिणी वागेनमश्रृणोत् 'राजन्! तव मनोरथः सेत्स्यति, मा चिन्तां गमः इति। श्रुत्वैतच्चण्डमहासेनो महान्तमानन्दमवाप्य, सद्य एव दूतमाहूयेवमाज्ञापयामास 'कौशाम्बीं गत्वा वत्सराजमेवं मद्वचनात ब्रूहि; यथा 'विदितं खलु भवान गान्धर्वविद्यायामतीव निपुणः; मम दुहिता वासवदत्ता त्वतो गान्धर्वविद्यामध्येतुमिच्छति; तत्, यद्यस्ति मयि सौहृदमित आगत्य वासवदत्ता अनुशिक्षणीया' इति। दूत कौशाम्बीं गत्वा तथैव निवेदयामास।

वत्सराजस्तु विपक्षवचनानि अमृतशानि आकर्ण्य यौगन्धरायणमाहूय रहस्येवं बभाषे 'मन्त्रिन्! ऊह्यतां केन कारणेन चण्डमहासेन एवं मन्दिशति? किं दर्पेण! उत अन्येन केनाप्यभिप्रायेणे' ति. महामतिर्यौगन्धरायणो वत्सराजस्य हितैषितयैवं प्रत्युवाच— — महाराज! 'भवान मृगयायां गान्धर्वविद्यायां चात्यन्तं व्यसनीति विदितं सर्वत्र। चण्डमहासेनः कन्यारत्नेन त्वां वशीकर्तुं यतते। यो मृगयादिष्वत्यासक्तिमादधाति स श्वभ्रपातेन गृहीतो वनगजः इव परहस्तगतो महत कृच्छ्रमनुभवति। तदितःपरं त्यज्यतां मृगयादिष्वत्यासक्तिरिति। इदमा-

कार्यं वत्सराजश्चण्डमहासेनस्य दूतमेवमाज्ञापितवान 'गच्छ तत स्वामिनमेतं मद्वचनात् ब्रूहि, यदि तव दुहिता गान्धर्वविद्यां सत्येतु-मिच्छति, तर्हि तामितः प्रेषय, अध्यापयामि नाम' इति ।

एवं सन्दिश्य दूतं प्रस्थाप्य वत्सराजश्चण्डमहासेनस्योपरि बलवच्चुकोप; सद्य एव तमभिषेणयितुमियेष । ततो यौगन्धरायण एवं बभाषे—'राजन्! अशक्यमिदं कर्तुम, अनुचितं च: चण्डमहासेनः खलु त्वया सह सम्बन्धम् इच्छति । श्रूयतां तस्य गतिवृत्तम्—आसीदुज्ज-यिन्यां महेन्द्रवर्मा नाम राजा । तस्य [illegible] पुत्रो बभूव । ततस्तस्यापि पुत्रो महासेनो नाम जज्ञे । स [illegible] चातितीयश्चि-राय राज्यं परिपालयामास । स कदाचिद् [illegible]—'कथमनुरूपमा-युधं कलत्रं च कथं लभ्येत' इति । [illegible] गत्वा, चण्डिकां प्रणम्य, तत्रैव बहून् दिवसान् दुष्कर [illegible] ने चात्मीयं शिरो निकृत्याग्नौ जुहाव । तदानीं प्रसन्ना चण्डिका [illegible] पुनः साक्षात् आविर्बभूव । तां दृष्ट्वा स [illegible] प्रणम्य प्रांजलिरतिष्ठत् । तं दृष्ट्वा देवी चण्डिका एतमुवाच—'राजन्! अनेन ते तपसा प्रसन्नास्मि। गृहाणेमं खड्गम्, अनेन त्वं [illegible] भविष्यसि; किञ्च, अस्त्यङ्गारको नामासुरराजः । [illegible] नाम कन्यारत्नमस्ति । सा तव भार्या भविष्यति; यतस्त्वं मम प्रीत्यर्थाय चण्डं कर्म कृतवानसि; तस्माच्चण्डमहासेन इति ख्यातिमवाप्स्यसी' त्युक्त्वा देवी चण्डिका तिरोबभूव ।

चण्डमहासेनस्तु फुल्लितमनोरथो महान्तमानन्दमध्यगच्छत ।

तस्य च पूर्वमेव अप्रतिभटो मत्तवारण आसीत्। इदानीं च देव्याः प्रमादेन खड्गो लब्धः। अतः शत्रुभिरप्रधृष्यो जातः।

अथ कदाचिच्चण्डमहासेनो मृगयायै वनं जगाम। तत्र पर्वतसमानाकृतिं सूकरमेकं ददर्श। स च महता कोपेन वेगेन च राजानमभिदुद्राव। राज्ञा तीक्ष्णैः शरैर्मर्मसु प्रहतोऽपि तद्व्यथामनादृत्य रथं छिन्नं भिन्नं कृत्वा चूर्णीचकार। ततश्च बिलमेकं प्रविवेश। विरथः पदाती राजा दुस्सहेन रोषेण तं सूकरमनुसृत्य बिलं विवेश। वराहस्तु किञ्चित् दूरं गत्वाऽदृश्यो बभूव। चण्डमहासेनस्ततः इतः पश्यन् विस्तीर्णं विपिनमेकमवजगाहे। तत्र विभ्रमतः परिभ्रमन् पर्वतोपमेन प्राकारेण परिवृतं नगरमेकं ददर्श। तस्य च बहिरुद्याने स्वच्छसलिला कापि वापी बभूव। तस्याः तीरं किञ्चित् कालं निषद्य अध्वश्रमं परिहरन् आस्त। तदा तत्रैवागच्छन्तीं मन्मथस्य जयलक्ष्मीमिव विराजमानां ह्रीभिः सखीभिर्दासीभिश्च परिवृतां कन्यकां ददर्श। सा च दूरादेव चण्डमहासेनं दृष्ट्वा दृढेनानुरागेण निर्निमेषं तमेवालक्षयन्ती मन्दं मन्दं तत्समीपमाययौ। आगत्य च, को भवान्? कुत आयातः? किं चिकीर्षसीति पप्रच्छ। चण्डमहासेनस्तु स्वोदन्तं सर्वं यथावन्निवेदयामास। तच्छ्रुत्वा सा कन्यका आकस्मिकेन दुःखेन नेत्राभ्यामश्रु मुञ्चन्ती रोदितुमारेभे। चण्डमहासेनः 'का त्वं? कस्य दुहिता? किं निमित्तं रोदिषी'ति पप्रच्छ। सा त्वेवं बभाषे। महाभाग! श्रूयतां यस्त्वया सूकराकृतिर्दृष्टः सोऽङ्गारको नामासुरराजः। तस्याहमङ्गारवती नाम दुहिता। दर्शनमात्रेण त्वयि अनुरक्ता अस्मि; सोऽयं मम जनकस्तपोबलेन वज्रेणाप्यभेद्यं गात्र-

मवाप्तवान्। बहूनां भूपतीनामन्तःपुरेभ्यो बह्वीः कन्यकाः मम परिचरणाय आहृतवान्। सोऽयमिदानीं क्षुत्पिपासादिभि परिश्रान्तः शेते। सुप्तोत्थितश्च त्वां दृष्ट्वा नियतं हनिष्यति। अचिरादेवापतिष्यन्तीं तवापदमभिवीक्ष्य परिदृये' इति।

एवमङ्गारवत्या वचनमाकर्ण्य चण्डमहासेनस्तामेवं बभाषे। भद्रे! मा भैषी; भवितव्यं भवत्येव; यद्यस्ति मयि प्रीतिः, मद्वचनमनुतिष्ठ। यदायं स्वापादुत्तिष्ठति, तदा त्वं तस्य पुरतः स्थित्वा साश्रुविसर्गं रुदिहि। मच्च अवश्यं, 'किं ते दुःखस्य कारणमि'ति प्रक्ष्यति। तस्यैवं प्रतिब्रूयाः. 'तात! यदि त्वत्तोऽपि शूरः कश्चिदागत्य त्वां निहनिष्यति। तदाहमनाथा किं करिष्यामी'ति। तच्छ्रुत्वा स यत् प्रतिवदिष्यति, तन्मह्यं निवेदय। ततःपरं तव मम च श्रेयो भविष्यतीति। श्रुत्वैतदङ्गारवती तथैव कर्तुमभ्युपजगाम। पश्य कामदेवस्य नृशंसताम्; येन प्रेरिताः स्त्रियः पितुरपि वधाय प्रयतन्ते। ततः स पितुः सकाशाच्चण्डमहासेनस्याभद्रमाशङ्कमाना, तं कुत्रचित् प्रदेशे निलीनं विधाय, सुप्तस्य पितुः समीपं गत्वा, तस्य प्रबोधावसरं प्रतीक्षमाणावतस्थे।

ततः कतिपयमुहूर्तापगमे स्वापादुत्थितोऽङ्गारकश्चक्षुरुन्मील्य पुरतोऽश्रुधारां मुञ्चन्तीमङ्गारवतीं ददर्श। 'किमेवं रोदिषी'ति पृष्टा चैवमब्रवीत्—'तात! यदि त्वत्तोऽपि शूरः कश्चित् आगत्य त्वां हनिष्यति। तदा को मे शरणं भविष्यती,ति। तच्छ्रुत्वाङ्गारकः प्रहस्य

प्राह—पुत्रि! अपि न जानासि कृतघ्नोऽपि मम देहो वज्रमय इति। किन्तु मम मध्ये पाणौ सूक्ष्ममेकं रन्ध्रं वर्तते। तत्र प्रहारे मम मरणं भविष्यति। नेदं मदन्यः कोऽपि जानाति। एवम्स्थिते मां हन्तुं कः शक्नोति?। तत् त्वं मा शुचः 'इति'।

एवमस्य सम्भाषणानि निलीनश्चण्डमहासेनः शुश्राव। ततः स एवाङ्गारकः तल्पादुत्थाय स्नात्वा देवस्य त्र्यम्बकस्य पूजामारभे। तमेवावसरमभिवीक्ष्य चण्डमहासेनो धनुषि ज्यामारोप्याङ्गारं युद्धायाजुहाव। तदानीं मौनव्रतमुज्झितुमनिच्छन्नङ्गारकः तस्य गर्वं करमुद्धृत्य प्रसार्य 'किञ्चिद्विलम्बं सहस्वेति संज्ञां चक्रे। चण्डमहासेनोऽप्ययमेवावसर इति मत्वा सरभसं तस्मिन् बाणान् ववर्ष। मर्मणि प्रहतोऽङ्गारकः प्राणां स्तत्याज। तदनन्तरं चण्डमहासेनो निर्भयमङ्गारवतीं परिणीयोज्जयिनीं प्रति निववृते। गतेषु कतिपयेषु दिवसेष्वङ्गारवती गोपालकः पालकश्चेति द्वौ पुत्रौ सुषुवे। ततः कदाचिच्चण्डमहासेनः इन्द्रमहोत्सवं कारयामास। तेन प्रीतो महेन्द्रः साक्षादाविर्भूय चण्डमहासेनमब्रवीत्—'राजन्! भृशं प्रीतोऽस्मि त्वयि: तन्मम प्रसादेन रूपं गुणं चानुपमं कन्यारत्नं लप्स्यसे, इति। तथैव तस्य कन्यारत्नं समजनि। तस्याः कन्यायाः जननसमये आकाशेऽशरीरिणी वागेवमश्रूयत— 'अस्याः कन्यायाः गर्भे कामदेवस्यांशभूतः कश्चित् तनयः उदेष्यति। स च विद्याधराणां चक्रवर्ती भविष्यती'ति। चण्डमहासेनस्तच्छ्रुत्वा महान्तमानन्दमवाप। ततश्च तस्या वासवेन दत्तत्वात् वासवदत्तेत्यन्वर्थमेव नाम कृतवान्।

मा च कन्या शुक्लपक्ष शशिकलेव क्रमेणोपचीयमानावयवा पित्रोः लोचनमानन्दयामास।

एवं महाप्रभावश्चण्डमहासेनो दुर्गेण बलेन चाप्रधृष्यः सर्वथा जेतुमशक्यः। किञ्चासौ स्वदुहितरम् भर्तृ दातुम् इच्छति। तथापि मानितया याच्ञाभङ्गभयेन च प्रथमतः प्रार्थयितुं नोत्सहते। 'वासवदत्ताया त्वमेव भर्ता भविष्यसी'त्यत्र न संशय इत्येवमुक्त्वा यौगन्धरायणो विरराम। एतदाकर्ण्योदयनो वासवदत्तामेव सततम् अनुस्मरन् कतिपयं कालमयापयत्।

इति तृतीयः उच्छ्वासः

—-*—

अथ चतुर्थः उच्छ्वासः।

एवं स्थिते वत्सराजस्य सन्देशम् आदाय उज्जयिनीं गतो दूतः वत्सराजेन दत्तम् उत्तरं चण्डमहासेनस्य समीपे यथावन्निवेदयामास। तद् आकर्ण्य चण्डमहासेनः एवं मनसि अकरोत्—मानिनाम् अग्रणीः उदयनः, नास्मत्प्रार्थनाम् अङ्गीकरिष्यति। वासवदत्तायाः तत्समीपे प्रेषणे च अस्माकं अत्यन्तं लाघवम्। तदिदानीम् उपायैः उदयनं वशीकर्तुमेव साम्प्रतम्' इति। एवं निर्धार्य सेनापतिम् आहूय 'महान्तम् एकं यन्त्रहस्तिनम् निर्मापय' इति आज्ञापितवान्। स च कुशलैः शिल्पिभिः यन्त्रहस्तिनं निर्मापयामास। चण्डमहासेनः यन्त्रहस्तिनम् अन्तः बहून् योधान् अन्तर्भाव्य विन्ध्य-

कानने सञ्चारयामास। गजग्रहणे महत् कौतूहलम् आवहन् उदयनो वनेचरैरेवं विज्ञापितो बभूव—देव 'विन्ध्यकानने महाकृतिः मतङ्गजः सञ्चरति। एतादृशः गजः नाद्यावधि अस्माभिः दृष्टपूर्वः। महता वर्ष्मणा पर्वत इव दृश्यते, इति। श्रुत्वैतत् उदयनः महता हर्षेण वनेचरेभ्यः निष्कशतम् पारितोषिकं प्रददौ। अथ चैवं मनसि अचिन्तयत्—'चण्डमहासेनस्य 'नडागिरिः' नाम महान् मतङ्गजः अस्ति। तस्य प्रतिहस्तितया इमं सम्पादयिष्यामि। ततः चण्डमहासेनः सुखेन जय्यः भविष्यति। वासवदत्ताञ्च स्वयमेव दास्यति' इति।

एवं मनोरथं मनस्याकल्प्य परेद्युः प्रभाते मन्त्रिभिः निवारितोऽपि गजग्रहणाय प्रस्थाय, वनेचरान् अनुचचार। मन्त्रिणस्तु कार्तान्तिकान् आहूय तत्प्रस्थानमुहूर्तस्य फलं पप्रच्छुः। ते तु 'कारागृहवासम् अनुभूय कन्यकां लप्स्यते' इति निवेदयामासुः। विन्ध्याटवीं गतः वत्सराजः 'सैन्यदर्शनेन संक्षुभितो वनगज पलायेत' इति शङ्कया सैनिकान् दूरत एव स्थापयित्वा कतिपयपरिजनानुयातः परिबभ्राम। श्रवणसुभगा वसुभूत्तां घोषवतीं नाम वीणां वादयन् वत्सराजः वनान्तरे सर्जीवं गजमिव शनैः शनैः सञ्चरन्तं यन्त्रहस्तिनं ददर्श।

महाकुशलोऽप्ययम् उदयनः सायं अन्धकारेण श्यामायमाने वने मायागजं तं सजीवं गजं इति मत्वा, मन्दं मन्दं तत्समीपम् उपससार। मायागजस्तु कर्णमूलं तद्वीतेन आकृष्ट इव

शूर्पाकृती कर्णौ निभृतम् उत्क्षिप्य, पुनः पुनः सन्निहितो व्यवहितश्च भूत्वा निर्जने वने राजानं सुदूरम् आचकर्ष। अन्ततश्च राजानम् असहायम् आलोक्य तदन्तर्निलीनाः योधाः झटिति बहिः निर्गत्य शस्त्रपाणयः परितः परिवव्रुः। तान् आलोक्य कुपितो वत्सराजः कोशात् आकृष्टेन खड्गेन सर्वान् तान् निपातयामास। अत्रान्तरे गहनगुल्मे निलीना अपरे योधाः सरभसमभिपत्य पृष्ठतः प्रतिजगृहुः। सङ्केताहूतास्तत्र तत्र निलीना बहवो योधा उपर्युपरि अभिद्रुत्य, तम् आवध्य, चण्डमहासेनस्य अन्तिकम् आनिन्युः। चण्डमहासेनश्च वत्सराजं विशेषतः सबहुमानम् उपचचार। अथैवम् उवाच—'राजन्! मा भूत् ते मनसि व्याकुलता। न ममास्ति त्वयि प्रद्वेषः। मम सुता वासवदत्ता गान्धर्वविद्याम् अध्येतुम् उत्सुका वर्तते। ताम् अध्यापय। ततः श्रेयः अवाप्स्यसि' इति।

उज्जयिनीनगरवासिनः पौराः वत्सराजे महान्तं स्नेहम् आबबन्धुः। ततश्च चण्डमहासेनः कदाचित् उदयने अभद्रम् आचरिष्यतीति संशयितमानसाः परस्परं मिथो मन्त्रयामासुः। एवं पौरेषु बहुलीभवन्तं संशयं चारैः विदित्वा चण्डमहासेनः तान् आहूय एवं निवेदयामास—'नास्ति मम वत्सराजे द्वेषः। तेन सह सौहृदं सम्पादयितुम् उपायोऽयं मया अनुष्ठितः। तन्मा भून्मयि भवताम् अन्यथा विकल्पः' इति। अथ चण्डमहासेनेन प्रेरिता वासवदत्ता उदयनम् उपसृत्य गान्धर्वविद्याम् अध्येतुं आरेभे।

पूर्वमेवाङ्कुरितो वासवदत्तावत्सराजयोः परस्परम् अनुरागस्तदानीं पल्लवितो बभूव।

इति चतुर्थ उच्छ्वासः।

अथ पञ्चम उच्छ्वासः

अत्रान्तरे कौशाम्ब्यां वत्सराजः विपक्षस्य चण्डमहासेनस्य हस्ते लग्नः इति महान् कोलाहलः संजातः। सद्य एव बलानि प्रस्थाप्य उज्जयिनीनगरम् उपरोद्धव्यम् इति च सर्वतः पौरैः उद्घुष्टम् आसीत्। तदानीं मन्त्रिषु अन्यतमः रुमण्वान् सर्वान् पौरान् आहूय एवम् अब्रवीत्—'चण्डमहासेनः बलेन जेतुम् अशक्यः। स चण्डिकायाः प्रसादेन अपरिमेयं बलम् अवाप्तवान्। किञ्च अस्माकम् अभिषेणनं श्रुत्वा स कदाचित् उदयने अभद्रम् आचरिष्यति। तस्मात् इदानीम् अभिषेणनम् असाम्प्रतम्। कार्यमिदं पर्यालोच्य सूक्ष्मया बुद्ध्या साधनीयम्' इति। ततः सूक्ष्मधिषणः यौगन्धरायणः एवं मन्त्रयामास—'भोः पौराः! सर्वैः भवद्भिः इहैव स्थातव्यम्। रुमण्वांश्च समग्राणि राज्यकार्याणि अवेक्षिष्यते। अहं तु वसन्तक-द्वितीयः इतः प्रस्थाय मदीयेन मतिविभवेन वत्सराजं विपक्षहस्तात् मोचयित्वा इह आनेष्यामि। नात्र संशयः। आपत्काले प्रदर्शनीयाः तिरस्करिण्यादिका विद्याः मयि वर्तन्ते' इति। एवमुक्त्वा यौगन्धरायणः सर्वाः प्रकृतीः रुमण्वतः हस्ते निक्षिप्य वसन्तकेन सह उज्जयिनीं प्रति प्रतस्थे।

विन्ध्यकाननेषु गच्छन् उदयनस्य प्रियमित्रं पुलिन्दकनामानं निषादराजम अपश्यत्। स च यौगन्धरायणम् आतिथ्येन सत्कृतवान्। यौगन्धरायणः तस्मै स्वस्य चिकीर्षितं सर्वं कथयामास। अन्ततश्च एवम् अर्थितवान्—'वत्सराजः पुनरावृत्तौ भवता रक्षणीयः। महता सैन्येन सह भवान् अत्रैव जागरूकः तिष्ठेत्' इति। पुलिन्दकः तथेत्यभ्युपजगाम। ततो यौगन्धरायणः वसन्तकेन सह प्रस्थाय, उज्जयिनीनगरस्य समीपम् अगात्। तत्र भयङ्कराकारैः बहुभिः वेतालैः परिवृतं पितृवनं प्रविवेश। तत्र योगेश्वरो नाम वेतालः यौगन्धरायणस्य मित्रम् आसीत्। यौगन्धरायणेन अभ्यर्थितः योगेश्वरो रूपविपरिवर्तनाख्यां विद्यां तस्मै उपदिदेश। तया विद्यया सद्य एव विकृतरूपो यौगन्धरायणः स्थविरो वामनः उन्मत्ताकृतिश्च बभूव। तयैव विद्यया वसन्तकमपि तुन्दिलं विकृताननञ्च चकार। न द्वारि स्थापयित्वा, यौगन्धरायणो राजगृहं प्रविवेश। सर्वेऽपि पौरबालकाः यौगन्धरायणम् 'उन्मत्त' इति मत्वा, सहस्ततालम उद्घुष्य परिवव्रुः। तदनुगुणमेव यौगन्धरायणोऽपि नृत्यन् गायंश्च बालानां कुतूहलहेतुः आसीत्। श्रुत्वैतत् वासवदत्ता सखीं सम्प्रेष्य यौगन्धरायणम् अन्तःपुरम् आनाययामास।

उन्मत्ताकृतिः यौगन्धरायणः तत्र शत्रोः वशे वर्तमानम् उदयनम् अभिवीक्ष्य निकामं नेत्राभ्याम् अश्रूणि प्रावर्तयत्। उदयनोऽपि तदीयैः इङ्गितैः यौगन्धरायणं रूपान्तरेण अन्तरितं बुबुधे। ततश्च यौगन्धरायणः झटिति योगशक्त्या तत्रैव अन्तर्हि

नस्तस्थौ । उदयनस्य केवलं दृष्टिगोचरः बभूव । तत्रत्याः सर्वे क्व गतोऽयम् उन्मत्तः इति व्यस्मयन्त । उदयनस्तु यौगन्धरायणस्य स्वदृष्टिमात्रगोचरताम् अभिवीक्ष्य, तेन सह संलपितुम् अवकाशम् अवाप्तुं वासवदत्तां 'वाग्देव्याः पूजनाय पूजाद्रव्याणि आहर' इत्यादिदेश । सा च तथेति सखीभिः सह निर्जगाम ।

अत्रान्तरे यौगन्धरायणो निगलच्छेदनं वासवदत्तायाः वशीकरणम् इत्यादीनि योगविद्याकौशलानि उदयनाय उपदिश्य, रूपान्तरितं वसन्तकं द्वारि तिष्ठन्तं विज्ञाप्य, झटिति निर्जगाम ।

अथ वासवदत्ता पूजोपकरणान्यादाय आजगाम । उदयनः तैः वाग्देवीम् अर्चयितुम् आरेभे । 'तत्र दक्षिणां प्रतिग्राहयितुं द्विजः कश्चित् द्वारि तिष्ठति । स इह आनीयताम्' इति आदिदेश । वासवदत्ता च द्वारि तिष्ठन्तं विकृतरूपं वसन्तकम् अन्तः प्रवेशयामास । स च दक्षिणां प्रतिगृह्य विपक्षस्य वशे स्थितं राजानं दृष्ट्वा महत् दुःखम् अन्तः नियन्तुम् अशक्नुवन् मुक्तकण्ठं प्रारोदीत् । उदयनस्तु, वसन्तकोऽयं कदाचित् शोकातिरेकेण कार्यं विस्मृत्य याथातथ्यं प्रकाशयिष्यति' इति शङ्कितः एवम् उवाच—'भो ब्राह्मण! योगेन विकृतशरीरं भवन्तं शीघ्रमेव प्रकृतिस्थं करिष्यामि । अलं रुदितेन । इतः परम् इहैव मत्सन्निधौ स्थीयताम्' इति । वसन्तकश्च तथेत्युक्त्वा शरीरवैरूप्येण कन्यकानां क्रीडनक इव भूत्वा, सततं कुतूहलिन्याः वासवदत्तायाः मनो विनोदयन् आस्त ।

एवं कतिपये काले प्रयाते, वासवदत्ता वत्सराजे अनुरागम् आबबन्ध। अयस्कान्तेनेव सूचीशलाका तदीयैः रूपादिभिः गुणगणैः आकृष्यमाणा वासवदत्ता मनसा तमेव आत्मनः पाणिग्राहकं वव्रे। अथ यौगन्धरायणो वृत्तान्तम् इमं विदित्वा अन्यैः अलक्षितः आगत्य वत्सराजस्य पुरतः स्थित्वा एवम् उवाच—'महाराज! चण्डमहासेनेन प्रतारितः त्वम् अनर्हाम् इमां पारतन्त्र्यदशाम् अनुभवसि। चण्डमहासेनश्च वासवदत्ताप्रदानेन भवन्तं सत्कृत्य बन्धनान्मोचयितुमिच्छति। तद्भवतस्तं कालं प्रतीक्ष्य इह अवस्थानम् अनुचितम्। अपि तु वासवदत्तां बलात् गृहीत्वा वरमितोऽपसरणम्। तथाकृते प्रतारकस्य तस्य प्रतिकृतं भविष्यति। तत्र अयम् उपायो मया चिन्तितः। चण्डमहासेनः वासवदत्तायै भद्रवतीं नाम करेणुकां दत्तवान्। सा च अतीव वेगेन गन्तुं समर्था। तस्याः हस्तिपकः आषाढको नाम अस्ति। स मया भूरिद्रव्यं दत्त्वा अस्माकं मनोरथस्य अनुकूलः कृतः। किञ्चात्र महामात्रो नाम मन्दुराधिपोऽस्ति। अतीव निपुणः सः यथा मदगोहेन निश्चेतनो भवेत्, तथा अपरिमितं मद्यं तस्मै दातव्यम्। एवं पूर्वसंविधानानि कृत्वा अर्द्धरात्रे अन्यैः अलक्षितः वासवदत्तया सह करेणुकाम् आरुह्य आप्तैः आरक्षकैः परिवृतः नगरात् बहिः निर्गच्छ। अहन्तु पुरतः गत्वा पुलिन्दकनाम्ना भवतो मित्रेण सह सङ्गतः मध्येमार्गं सम्भाव्यमानान् प्रत्यूहान् प्रशमयन् भवतः आगमनं प्रतीक्षिष्ये इति।

एवम् उदयनाय कर्तव्यम् उपदिश्य यौगन्धरायणः बहिः निर्जगाम। उदयनः क्षणकालं ध्यात्वा कर्तव्यानि सम्यक् अवधारयामास। अथ वासवदत्ता तस्य समीपम् उपजगाम। तया सह सुचिरं बह्वीः कथाः कथयित्वा तदीयं हृदयं बहुधा परीक्ष्य अन्ततः मत्कार्यस्य इयम् अनुकूलैव भविष्यति इति निश्चितवान। तस्यां सञ्जातविस्रम्भोऽयम् उदयनः तस्यै स्वस्य चिकीर्षितं कथयामास। सा च महर्षम् उदयनम् अनुगन्तुम् अनुमेने। अथ आषाढकं नाम हस्तिपकम् आहूय एवम् आज्ञापितवती। 'भद्रवतीम् प्रयाणाय सज्जीकृत्य अत्रैव स्थित्वा प्रयाणकालं प्रतीक्षस्व' इति। तदनन्तरम् उदयनस्य मनोरथम् अनुवृत्य देवतानां व्याजीकृत्य मन्दुराधिपाय महामात्राय अन्येभ्यः हस्तिपकेभ्यश्च अपरिमितं मद्यं दापयामास। तेन उन्मदाः सर्वे ते निःसंज्ञाः बभूवुः।

अथ अर्धरात्रे उदयनः घोषवतीं वीणाम् आदाय यौगन्धरायणोपदिष्टेन योगकौशलेन निगडम् आच्छिद्य आप्तैः आरक्षकैः परिवृतः वसन्तकेन सह भद्रवतीम् आरुरोह। वासवदत्तापि सर्वं रहस्यवृत्तान्तम् अन्तः नियम्य धारयन्त्या काञ्चनमालाख्यया सख्या सह नामैव करेणुकाम् आरुरोह। चतुर्णां पुरतः पञ्चमः हस्तिपकश्च नाम् अरुरोह। एवं पञ्चभिः अधिष्ठिता भद्रवती तीव्रेण जवेन प्रतस्थे।

ततः वीरबाहुः ताळभटः इति द्वौ प्राकाररक्षिणौ मार्गं रुरुधतुः। उदयनः तौ खड्गेन निपात्य अतिवेगेन पुरात् निर्जगाम। सुदूरम् अतिक्रान्ते उदयने आरक्षकाः कोलाहलम् अकुर्वन्। राज्ञे च निवेदयामासुः। राजा च वासवदत्तां गृहीत्वा पलायितम् उदयनं गृहीतुम् पालकनामानं स्वपुत्रम् आदिदेश। सच भद्रवत्यां अतीव प्रेमयुक्तं नडागिरिं नाम हस्तिराजम् आरुह्य अन्वधावत्। उदयनोऽपि पृष्ठतः आगच्छन्तं पालकं बाणवर्षैः अवाकिरत्। नडागिरिश्च तां भद्रवतीं दृष्ट्वा सानुरागः शान्तवेगः मन्दं मन्दं ताम् अनुससार।

अत्रान्तरे गोपालको नाम चण्डमहासेनस्य द्वितीयः कुमारः पितुः अभिप्रायम् अनुसृत्य पृष्ठतः सरभसम् आगत्य पालकं युद्धात् निवर्तयामास। प्रतिनिवृत्ते पालके वत्सराजः निर्भयं प्रययौ। अथ विन्ध्याटवीमध्यम् अवाप। रात्रिश्च प्रभाता आसीत्। तदानीं सुदूरप्रयाणेन अतीव तृषिता भद्रवती तत्रत्ये तटाके पानीयं पपौ। तत्पानीयदोषेण सद्य एव सा पञ्चतामवाप। उदयनस्तु वासवदत्तया सह नितरां शोचन् अकस्मात् उद्गताम् आकाशवाणीं शुश्राव। राजन्! अहं मायावती नाम विद्याधरवनिता। एतावन्तं कालं शापदोषेण हस्तिनी अभवम्। तव इमम् उपकारं कृत्वा शापात् मुक्तास्मि। इतः परमपि भविष्यतः तव कुमारस्य उपकारं करिष्यामि, इति।

अथ वत्सराजः विन्ध्यस्य अधित्यकायां निवसते सुहृदे पुलिन्दकाय स्वागमनं निवेदयितुं वसन्तकं प्राहिणोत्। अथ तत्रैव वासवदत्तया सह पादाभ्यामेव चरन्तमेनं वनेचराः पञ्चोत्तरशतं दस्यवः परिवव्रुः। धनुर्मात्रसहायः वत्सराजः वासवदत्तायाः समक्ष मेव तान् सर्वान् अवधीत्। अथ अन्ये दस्यवः सङ्घीभूय तम् अभ्यधावन्। अत्रान्तरे पुलिन्दकः वसन्तकेन प्रदर्शितमार्गः यौग न्धरायणेन समं तं प्रदेशम् आजगाम। सः तान् दस्यून् निवार्य वत्सराजं प्रणम्य वासवदत्तया समम् आत्मनः पल्लीम् आनिनाय। उदयनश्च तत्रैव तां निशां निनाय। अथ अपरेद्युः प्रभाते यौगन्ध रायणप्रहितेन दूतेन विदितवृत्तान्तः सेनापतिः रुमण्वान् सर्वैः सैनिकैः परिवृतः तं प्रदेशम् आजगाम। उदयनस्तु उज्जयिनीवार्तां परिज्ञातुं तस्यामेव विन्ध्याटव्यां कञ्चित् कालम् उवास॥

इति कारागृहमोक्षो नाम पञ्चमः उच्छ्वासः।

षष्ठः उच्छ्वासः।

अत्रान्तरे उज्जयिनीवृत्तान्तं परिज्ञातुं यौगन्धरायणेन अनु प्रेषितः कश्चन वणिक् उज्जयिनीं गत्वा विदितवृत्तान्तः समागत्य

उदयनम् एवम् अब्रवीत् । महाराज! चण्डमहासेनः त्वयि अतीव प्रीतिमान् वर्तते । भवन्तम् उद्दिश्य दूतमेकं प्रेषितवान् । स च दूतः सन्देशम् आदाय मया सहैव प्रस्थित । अहन्तु वृत्तान्तं निवेदयितुं सत्वरम् आगतोस्मीति ।

श्रुत्वैतत् आनन्दभरितः वत्सेशः वासवदत्तायै निवेदयामास । सापि महति प्रमोदसागरे निमग्नः विवाहमहोत्सवः कदा भविष्यतीति मनसा चिन्तयन्ती आस्त । अथ चण्डमहासेनस्य दूतः समागत्य वत्सराजं प्रणम्य एवं विज्ञापयामास । देव ! महाराजः चण्डमहासेनः सस्नेहं मन्नुखेन निवेदयति । "पूर्वमेव वासवदत्तायाः भवानेव सदृशो वरः इति मम मनोरथः आसीत् । तां प्रतिग्राहयितुमेव मया अयम् उपायः अनुष्ठित । तत् मन्मनोरथस्याऽनुरूपमेव भवता अनुष्ठितम् । मम कुमारः गोपालकः सत्वरमेव तत्राऽऽगत्य युवयोः यथाविधि विवाहोत्सवं निर्वर्तयिष्यतीति" । इति वत्सराजाय निवेद्य स दूतः वासवदत्तायाः अपि पितुःसन्देशम अबोधयत् ।

अथ वत्सराजः वासवदत्तया सह कौशाम्बीं प्रति प्रतस्थे । तं दूतं पुलिन्दकञ्च एवम् आदिदेश । "युवाम् अत्रैव स्थित्वा गोपालकस्य आगमनं प्रतिपाल्यतम् । तम् आदाय कौशाम्बीम् आगच्छतम् इति" । समुद्रकल्लोलैरिव अहमहमिकया निर्गतैः असंख्येयैः सैनिकगणैः परिवृतः वत्सराजः द्वितैरेव दिनैः मार्गम् अ-

तीत्य प्रभाते कौशाम्बीम् आससाद । तदानीं सकुतूहलाः सर्वे पौराः नगरीं तोरणादिभिः अलंकृत्य वत्सराजस्य आगमनम् अभिननन्दुः । प्रख्यातसौन्दर्यां वासवदत्ताम् द्रष्टुकामाः सर्वाः नगरनार्यः प्रासादम् आरुह्य गवाक्षेषु पङ्क्तिशः अतिष्ठन् । सर्वैः पौरैः सबहुमानम् अभिनन्दितागमनः वत्सराजः वासवदत्तया सह आत्मीयं प्रासादं प्रविवेश ।

अथ कतिपयेषु दिनेषु गतेषु वासवदत्तायाः भ्राता गोपालकः पितुः निदेशेन विन्ध्याटवीम् आगत्य दूतं पुलिन्दकञ्च आदाय कौशाम्बीम् आजगाम । अथ प्रशस्ते मुहूर्ते वासवदत्तायाः पाणिग्रहणमहोत्सवं निरवर्तयत् । तस्मिन् समये असंख्येयानि रत्नानि वत्सराजाय कितताः । अन्ये राजानश्च बहूनि उपायनानि आजह्रुः । एवं सर्वैः सुहृद्भि बन्धुभिश्च सादरम् अर्पितैः धनैः अस्य वत्सराजस्य कोशागाराणि परिपूर्णानि बभूवुः । तेनायं कुबेरतुल्यः बभूव ।

अथ यथाविधि विवाहमहोत्सवे निर्वर्तिते, वत्सराजः गोपालकं पुलिन्दकञ्च स्वयमेव सम्यक् सम्मानयामास । समागतान् इतरान् सर्वान् भूपतीन् सम्मानयितुं यौगन्धरायणं रुमण्वन्तञ्च आदिदेश । तौ च सर्वान् महीपतीन् तथा सम्मानयामासतुः । यथा एकैकोऽपि आत्मानमेव सर्वाधिकेन आदरेण बहुमानितं मेने । अथ उदयनः यौगन्धरायणं रुमण्वन्तं वसन्तकञ्च वस्त्राभरणादिभिः बहुधा

सम्भावयामास । वासवदत्ता च स्वानुरूपं भर्तारम् अवाप्य तेन सह देवलोकेऽपि असुलभान् भोगान् अनुभवन्ती सुखमास्त ।

इति वासवदत्तापरिणयो नाम
षष्ठः उच्छ्वासः ।

अथ मन्त्रिमन्त्रणं नाम

सप्तमः उच्छ्वासः ।

एवं वत्सराजः वासवदत्तां परिणीय तया सह रममाणः मन्त्रिणि यौगन्धरायणे, सेनापतौ रुमण्वति च, राज्यभारं निक्षिप्य निश्चिन्तः बहुतिथं कालम् अयापयत् ।

अथ कदाचित् यौगन्धरायणः रुमण्वन्तम् आहूय रहसि एवं मन्त्रयामास । अयं वत्सराजः पाण्डवानां वंशे जातः । पुरा कृत्स्नं भूमण्डलम् अस्य वशे आसीत् । अस्य कुलक्रमेण आगता राजधानी हस्तिनापुरी । तत्सर्वम् इदानीम् अनुत्साहवता अनेन परित्यक्तम् । इदानीम् अयं भूमेः एकत्र कोणे मण्डलेश्वरः वर्तते, सर्वदा अयं वनितासुखे मृगयाविहारे च आसक्तः निश्चिन्तः आस्ते । सर्वं राज्यभारम् अस्माकं शिरसि निक्षिप्तवान् । तत् यथा अयं समग्रस्य भूमण्डलस्य चक्रवर्ती भविष्यति तथा अस्माभिः प्रयतितव्यम् । एवं कृते अस्माकं राजनि भक्तिः प्रदर्शिता भविष्यति ।

अस्मिन् विषये मगधराजः प्रद्योतः केवलं परिपन्थी वर्तते। तस्य च पद्मावती नाम कन्यारत्नम् अस्ति। सा यदि वत्सराजस्य भार्या भविष्यति, तदा मगधराजोऽपि अस्मच्चिकीर्षितस्य अनुकूलो भविष्यति। सा च पद्मावती पूर्वं वत्सराजस्य कृते मया दूतमुखेन अभ्यर्थिता। तस्य प्रद्योतः एवं प्रतिसन्देशं प्रेषितवान्। "वत्सराजस्य वासवदत्तायां महान् स्नेहः इति प्रसिद्धम्। तत् प्राणेभ्योऽपि प्रियतमां पद्मावतीं तस्मै न प्रदास्यामि इति" वत्सराजश्च वासवदत्तायां सत्याम् अन्यां न परिणेष्यति। तत् अस्मिन् कार्ये अस्माकं मतिवैभवं प्रदर्शनीयम्।

वासवदत्ताम् एकत्र निलीनाम् अन्यैः अविज्ञातां निक्षिप्य तस्याः वासगृहे अग्निः देयः। ततश्च वासवदत्ता दग्धा इति किंवदन्ती लोकविदिता कर्तव्या। एवं कृते प्रद्योतः पद्मावतीं वत्सराजाय प्रदास्यति। वत्सराजश्च परिणेष्यति। ततश्च मगधराजे अनुकूलतां प्रपन्ने इतर राजानः सर्वेऽपि अस्य वशे भविष्यन्ति। तेनाऽयं कृत्स्नस्य भूमण्डलस्य चक्रवर्ती भविष्यति। इति॥

तत् श्रुत्वा रुमण्वान् एवम् आह। साहसमिदं कदाचित् अनर्थाय भवेत् इति बिभेमि। यदि कार्यं न सेत्स्यति तदा राज्ञः कोपः भविष्यति। जना अपि अस्मान् परिहसिष्यन्ति। वासवदत्तायाः वियोगेन राज्ञः कदाचित् अमङ्गलमपि सम्भाव्येत इति।

तत् श्रुत्वा यौगन्धरायणः आह । राजानो हि द्विविधाः । स्वायत्तसिद्धयः सचिवायत्तसिद्धयश्चेति । स्वायत्तसिद्धयः स्वबुध्यैव सर्वं कार्यं साधयन्ति । अस्माकं राजा तु सचिवायत्तसिद्धिः । अस्य कर्तव्येषु मन्त्रिबुद्धिरेव शरणम् । अस्मासु निरुत्साहेषु अस्य सर्वं विनंक्ष्यति । किञ्च अस्माभिः इदानीं साहसेनैव कार्यं साध्यम् । एवं विधानि कार्याणि अकृत्वा तूष्णीम् अवस्थाने राजा अस्मान् अवमंस्यते । गम्भीरहृदयः वत्सराजः वासवदत्ताविरोगेऽपि धैर्येण वर्तिष्यते । पुरा देवा रामेण रावणस्य वधं कारयितुं सीतया तं वियोजयामासुः । प्राणेभ्योऽपि गरीयसीं प्रियतमां सीतां हित्वापि रामः धैर्येण प्राणान् धारयामास । किञ्च । अस्मिन् विषये पुरातनी कथा श्रूयताम् ।

आसीदुज्जयिन्यां पुरा पुण्यसेनो नाम राजा । तञ्च कदाचित् बलाधिकः शत्रु अभिषेणयामास । बलहीनं पुण्यसेनम् अभिवीक्ष्य मन्त्रिणः सम्भूय पर्यालोच्य तं कुत्रचित् निलीनं कृत्वा "अस्माकं राजा मृतः" इति प्रख्यापयामासुः । अन्यं कञ्चन शवं "राज्ञः शवोऽयम्" इति प्रदर्श्य तस्य यथविधि संस्कारम् अकुर्वन् । अथ शत्रोः अन्तिकं गत्वा "अराजकम् इदं राज्यं, त्वमेव अस्माकं राजा भव" इति अभ्यर्थयामासुः । सोऽपि "सर्वमिदं तथ्यम्" इति मत्वा राजभावम् अङ्गीचकार । अथ कतिपये काले प्रयाते निगूढं सन्नाहितैः सैन्यैः तम् अरातिं समूलम् उन्मूल्य पुण्यसेनं पुनः स्वराज्ये प्रतिष्ठापयामासुः इति ।

तस्मात् राजनीतौ साहसं सहजमेव। अस्मिन् विषये न शङ्का कर्तव्या। दैवम् अस्माकम् अनुकूलं भविष्यति।

तत् श्रुत्वा रुमण्वान् आह। यद्येष निश्चयः तर्हि वासवदत्तायाः भ्रातरं गोपालकम् अत्र आहूय तेन सह सम्मन्त्र्य कार्यम् अवतार्यम् इति। यौगन्धरायणः तथेति अङ्गीकृत्य गोपालकाय दूतं विसमर्ज। दूतोऽपि सत्वरम् उज्जयिनीं गत्वा गोपालकं प्रणम्य, 'देव! मन्त्रिवर्यः यौगन्धरायणः भवन्तम् अविलम्बितं द्रष्टुम् इच्छति" इति विज्ञापयामास। सोऽपि सद्य एव प्रस्थाय कौशाम्बीम आजगाम। यौगन्धरायणः तं रहःप्रदेशम् आहूय तस्मै स्वस्य चिकीर्षितं सर्वं यथावत् आचख्यौ। गोपालकः प्रथमं वासवदत्तायाः दुःखप्रदमपि राज्ञः शुभोदर्कत्वात् तत वाक्यम् अनुपेनं।

अथ यौगन्धरायणः एवम् अब्रवीत्। अस्ति लावाणको नाम मगधदेशस्य समीपवर्ती प्रदेशः। स च मृगयाविहारिणां विनोदस्थानम्। तत् अस्माभिः वासवदत्तां वत्सराजं च आदाय तत्र गन्तव्यम्। यदा मृगयायै वत्सराजः बहिः गमिष्यति, तस्मिन् समये राजगृहे अग्निं प्रदास्यामः। वासवदत्तां मगधराजस्य कन्यान्तःपुरे पद्मावत्याः समीपम् उपायेन प्रापयिष्यामः। वियोगकाले च पद्मावत्येव वासवदत्तायाः पातिव्रत्यस्य साक्षिणी भविष्यति। एवं कृते अस्माकम् अभीप्सितम् अनायासं सेत्स्यति इति।

एवं सम्मन्त्र्य यौगन्धरायणः, रुमण्वान्, गोपालकश्चेति त्रयः परेद्युः प्रभाते प्राभातिकाः क्रियाः परिसमाप्य राज्ञः समीपम् अभिजग्मुः। यथार्हं सम्मान्य राज्ञा दत्तासनाः उपविविशुः।

अथ रुमण्वान् एवं राजानं व्यजिज्ञपत्। "देव! लावाणकः सुखभूमिः वर्तते। तं परितः बह्व्यः मृगयाभूमयः सन्ति। मगधराजश्च समीपस्थः सर्वदा तं प्रदेशं बाधते। तद्रक्षणार्थञ्च तत्र गन्तुम् इदानीम् उचितमिति"। "मृगयालालसः वत्सराजः तद्वाक्यम् अनुमेने। निश्चिते गमने ज्यौतिषिकाः प्रयाणाय लग्नं परिकल्पयामासुः।

तदानीम् अकस्मात् आकाशात् अवतरन् नारदः आविर्बभूव। तं दृष्ट्वा वत्सराजः सहसोत्थाय अर्घ्यपाद्यादिभिः उपचचार। अथतम् आसने उपवेश्य सविनयं कृताञ्जलिः तस्थौ। नारदः तस्मै पारिजातपुष्पमालां वितनार—अथ प्रणमन्तीं वासवदत्ताम् अभिवीक्ष्य "भद्रे! भगवतः कामदेवस्य अंशेन अवतरिष्यन्तं विद्याधराधिपं पुत्रम् अचिरेण अवाप्स्यसि" इति आशिषा अनुजग्राह। अथ मन्त्रिणां समक्षं वत्सराजम् एवम् अवोचत्।

"राजन्! युधिष्ठिरादयः पञ्च भ्रातरः मम सुहृदः अभूवन्। भवांश्च तेषां वंशे जातः। तत्प्रीत्या तव किञ्चित् उपदेष्टुम् इह आगतवान् अस्मि। त्वया मद्वाक्य इव मन्त्रिणां वचसि स्थातव्यम्। ते यत् यत् ब्रूयुः तत् तत् तथैव अनुतिष्ठेः। तेन त्वं महतीं समृद्धिम्

अवाप्स्यसि । अचिरेणैव कालेन तव किञ्चित् दुःखं सम्भविष्यति । तच्च सुखोदर्कमेव भविष्यति । न तत्र त्वया शोकः कार्यः इति" । इत्येवम् अभिधाय नारदः तत्रैव अन्तर्दधे । यौगन्धरायणाद्याश्च मुनेः वचनं श्रुत्वा स्वचिकीर्षिते दैवमपि अनुकूलमिति हर्षेण द्विगुणम् उत्साहम् अवापुः ।

इति सप्तमः उच्छ्वासः ।

॥ श्रीः ॥

अथ पद्मावतीपरिणयो नाम ।

अष्टमः उच्छ्वासः ।

अथ यथा मन्त्रिभिः मन्त्रितम् तथैव वत्सराजः वासवदत्तया सह ससैन्यः प्रस्थाय लावाणकं नाम ग्रामम् अवाप । तत्र प्रतिदिनं समीपस्थेषु काननेषु परिभ्रमन् मृगयया मनः विनोदयन् कतिपयान् दिवसान् अयापयत् । एकदा वनं गते वत्सराजे यौगन्धरायणः रुमण्वान् वसन्तकश्चेति त्रयः गोपालकं पुरस्कृत्य वासवदत्तं विजने समुपविष्टाम् उपसस्रुः । अथ च स्वचिकीर्षितानि सर्वाणि

संविधानानि कथयामासुः । पूर्वमेव गोपालकात् विदितवृत्तान्ता पतिव्रतोत्तमा सा वासवदत्ता आत्मनः क्लेशावहमपि भर्तुः शुभोदर्कत्वात् तेषां चिकीर्षितम् अनुमेने ।

अथ यौगन्धरायणः रूपविवर्तनाख्यया विद्यया वासवदत्तां ब्राह्मणस्त्रीरूपाम्, वसन्तकञ्च काणं माणवकम् अकारयत् । स्वयञ्च यौगन्धरायणः स्थविरब्राह्मणाकृतिः बभूव । अथ यौगन्धरायणः ब्राह्मणीवेषां वासवदत्तां, काणवटुवेषं वसन्तकञ्च आदाय मगधराजस्य राजधानीं जगाम । वासवदत्ता च भर्तारमेव मनसा चिन्तयन्ती यौगन्धरायणम् अनुजगाम ।

तस्मिन् समये रुमण्वान् अन्तः पुर अग्निं प्रदाय "हा ! हा ! कष्टम् । देवी वासवदत्ता दहनज्वालया दग्धा बभूव, इति घोषयामास । ततः सर्वेषां परिजनानां महान् आक्रन्दध्वनिः समभूत् । शनैः शनैः अग्निः शान्तः । आक्रन्दध्वनिस्तु प्रतिक्षणम् अभिवृद्धो बभूव । वासवदत्तया वसन्तकेन च सह प्रस्थितः यौगन्धरायणः पुष्पोद्यानं सखीभिः सह रममाणां पद्मावतीम् उपजगाम । पद्मावत्याश्च ब्राह्मणीरूपधारिण्यां वासवदत्तायां दर्शनमात्रेणैव महान् स्नेहः बभूव ।

अथच पद्मावती वृद्धब्राह्मणाकृतिं यौगन्धरायणम् एवं पप्रच्छ । "भगवन् ! केयं स्त्री ? किं निमित्तम् इह आगतोऽसि ?" इति, सः प्रत्यवादीत् । "भद्रे ! मम दुहिता इयम् आवन्तिकानाम । अस्याः पतिः इमां विसृज्य देशान्तरं गतवान् । तदिमां त्वत्स-

मीपे स्थापयित्वा भर्तारम् अस्याः अन्विष्य आनेतुम् इच्छामि । अयं काणवटुः अस्याः सहोदरः । एनमपि अस्याः समीपे विसृजामि । तेन इयम् एकाकिनीभावदुःखं न यास्यति " इति । पद्मावती तथा अस्तु इति अनुमेने ।

यौगन्धरायणः वासवदत्तां वसन्तकञ्च तत्रैव विसृज्य पद्मावतीम् आमन्त्र्य सद्य एव प्रस्थितः प्रतिपन्नपूर्वाकृतिः लावाणकं प्रत्याजगाम । अत्रान्तरे वत्सराजः मृगयायै अतिदूरेषु काननेषु परिभ्रम्य सायं लावाणकं प्रत्याययौ । तत्र अन्तःपुरं भस्मीकृतं दृष्ट्वा वासवदत्ताञ्च अग्निना दग्धां श्रुत्वा विसंज्ञो भूमौ निपपात । अथ परिजनकृतैः उपचारैः क्षणात् परं संज्ञां लब्ध्वा वासवदत्ताम् अनुस्मृत्य दुःखातिरेकेण बहुधा विललाप ।

अथ मनसि एवं चिन्तयामास । "पूर्वं खलु वासवदत्ता विद्याधरचक्रवर्तिनं पुत्रं प्रसोष्यते" इति उक्तम् अशरीरिण्या भारत्या । देवर्षिणा नारदेनापि तथैव उक्तम् । न च तत् मृषा भविष्यति । किञ्च, कञ्चित् कालम् मया दुःखम अनुभवितव्यम् इति नारदेन उक्तम् । वासवदत्तायाः सहोदरः गोपालकोऽपि स्वल्पशोकः दृश्यते । यौगन्धरायणादीनां मन्त्रिणां मुखान्यपि प्रसन्नान्येव दृश्यन्ते । तत् मन्ये मम महत् श्रेयः साधयितुम् इच्छतां मन्त्रिणां नीतिप्रयोगः एवायम् । तत् देवी वासवदत्ता यत्र कुत्रापि सप्राणा वर्तते इति सम्भावयामि । अतः कदाचित् मम वासवदत्तया सह समागमः सम्भविष्यति, इति चिन्तयित्वा वत्सराजः किञ्चित् धैर्यम् अवाप ।

अथ मगधराजः लावाणकवृत्तान्तं सर्वं चारमुखात् बुबुधे । अयमेव समयः पद्मावतीं प्रतिग्राहयितुम् इति निश्चित्य स्वाभिप्रायं सन्दिश्य दूतम् एकम् उदयनाय विससर्ज । उदयनश्च यौगन्धरायणानुमत्या पद्मावतीम् उपयन्तुम् अङ्गीचकार । तदानीं पद्मावतीपरिणयं निर्वर्तयितुमेव वासवदत्ता मन्त्रिभिः निगूढं निक्षिप्ता भविष्यति, इति वत्सराजस्य मनसि सुदृढा सम्भावना सञ्जाता ।

अथ यौगन्धरायणः पाणिग्रहणाय लग्नं निश्चित्य मगधराजस्य एवं प्रतिसन्दिदेश । "वत्सराजः पद्मावतीम् उपयन्तुम् अङ्गीकरोति । इतः सप्तमे दिने पाणिग्रहणं निर्वर्तयितुं भवतः राजधानीम् आगमिष्यति" इति । तत् श्रुत्वा प्रद्योतः महान्तं प्रमोदम् अवाप । अथ दुहितृवात्सल्यस्य विभवस्य च अनुगुणानि विवाह महोत्सवसंविधानानि प्रवर्तयामास । पद्मावती च स्वाभीप्सितस्य भर्तुः लाभेन नितरां ननन्द ।

तदानीं वासवदत्ता पद्मावतीपाणिग्रहणवृत्तान्तं श्रुत्वा शोकेन विवर्णवदना बभूव । समीपे वसन् वसन्तकः "देवि सामन्तस्य मगधराजस्य वशीकरणाय मन्त्रिभिः कृतः अयम् उपायः । नान्यथा मन्तव्यम्" इति रहसि सान्त्वयामास । अथ सन्निहिते विवाह मुहूर्ते वासवदत्ता वत्सराजात् अभ्यस्तया विद्यया अम्लानां मालां विचित्रं तिलकं च निर्माय पद्मावत्यै प्रददौ । पद्मावती तु ताभ्याम् अलंकृता जनन्याः समीपं ययौ । जननी विचित्रौ मालातिलकौ

दृष्ट्वा विस्मिता सती, "केन इमौ निर्मितौ ?" इति पद्मावतीं पप्रच्छ। सा प्रत्यवादीत् । "अम्ब! आवन्तिका नाम ब्राह्मणस्त्री मत्समीपे वसति। तया इमौ निर्मितौ" इति। तत् श्रुत्वा जननी बभाषे । वत्से! महानुभावेयं केनापि कारणेन आगता देवयोषित् स्यात् । तत् अस्यां विषये अवहिता भव । उचितैः उपचारैः बहुमन्यस्व इति । तदारभ्य वासवदत्ता पद्मावत्या नितरां बहुमानिता बभूव ।

अथ वत्सराजः यथानिर्दिष्टं मन्त्रिभिस्सह प्रस्थाय मगधराजस्य राजधानीं सम्प्राप्तः । मगधराजः तं प्रत्युद्गम्य सामोदं पुरं प्रवेशयामास । तत्र शुभे मुहूर्ते विवाहमण्डपं प्रवेशितः वत्सराजः पाणिग्रहणाय सन्नद्धां सर्वाभरणभूषितां पद्मावतीं ददर्श । पद्मावत्याः वपुषि वासवदत्तया निर्मितौ मालातिलकौ दृष्ट्वा "देव्याः वासवदत्तायाः करकौशलम् इदम्, कुतः एतौ समासादितौ अनया" इति मनसि विचारयामास । इति विचारयन्नेव विवाहवेदीम् आरुह्य विधिवत् पद्मावत्याः पाणिं गृहीतवान् ।

तस्मिन् समये मगधराजः यौगन्धरायणस्य अभ्यर्थनाम् अनुसृत्य "इतः परं स्वप्नेऽपि वत्सराजाय न द्रोहं करिष्यामि" इति प्रतिजज्ञे । अथ वत्सेश्वराय अनर्घाणि असंख्येयानि रत्नानि वितेतार । अथ समाप्ते विवाहमहोत्सवे यौगन्धरायणः 'वत्सराजः कदाचित् अन्तःपुरस्थां वासवदत्तां द्रक्ष्यति' इति शङ्कया

सद्यः एव लावाणकं प्रति प्रस्थानम् अकारयत् । पद्मावत्या सह प्रस्थिते वत्सराजे, वासवदत्तापि वसन्तकेन सह निगूढम् अनुययौ । सर्वदा वासवदत्तामेव मनसा स्मरन् वत्सराजः लावाणकं प्राप्य निजां वसतिं प्रविवेश । वासवदता तु सहोदरस्य गोपालकस्य वसतिम् प्रविश्य तत्र गोपालकं दृष्ट्वा वियोगदुःखम् अन्तः नियन्तुं अपारयन्ती मुक्तकण्ठं रोदितुम् आरेभे । तदानीं यौगन्धरायणः रुमण्वता सह तत्र गत्वा वासवदत्तां बहुधा सान्त्वयामास ।

अत्रान्तरे परिजनाः सरभसं धावित्वा वत्सराजस्य समक्षं पद्मावतीम् एवं निवेदयामासुः । "देवि आवन्तिका ब्राह्मणी अस्मान् बहिः स्थापयित्वा गोपालकस्य गृहं प्रविश्य केनापि दुःखेन मुक्तकण्ठं रोदिति" इति । तत् श्रुत्वा वत्सराजः पद्मावतीम् एवम् अपृच्छत् । "इमौ मालातिलकौ कुतः त्वया लब्धौ" इति । सा त्वेवं निवेदयामास । 'अस्ति केनापि वृद्धब्राह्मणेन मयि न्यासीकृता आवन्तिका नाम ब्राह्मणी । सा मया भोजनाच्छादनादिभिः उपचारैः सम्यक् उपचर्यमाणा मयि निरतिशयं स्नेहम् आबध्नाति । कतिपयदिवसेभ्यः पूर्वं मम पाणिग्रहणवृत्तान्ते प्रस्तूयमाने इमौ मालातिलकौ निर्माय मह्यम् अर्पितवती" इति ।

तत् श्रुत्वा वत्सराजः 'नूनमिदं वासवदत्तायाः एव शिल्पकौशलम्' इति निर्धार्य सद्य एव गोपालकस्य गृहं प्रविवेश । तत्र यौगन्धरायणेन पूर्वाम् आकृतिम् अवापिताम्, आत्मनः वियोगदुर्दशाम् अनुस्मृत्य नितरां शोचन्तीं, यौगन्धरायणेन रुमण्वता

वसन्तकेन च बहुधा सान्त्व्यमानां, वियोगदुःखेन कृशीभूतदेहां, वासवदत्तां ददर्श । दृष्ट्वा च बाष्पनिरुद्धेन कण्ठेन यत् किमपि वक्तुम् अशक्नुवन् नयनाभ्याम् उद्गलन्तीभिः अश्रुधाराभिः पुरःप्रदेशम् उपसिञ्चन् भूताविष्ट इव भूमौ निपपात । तथाविधं तं दृष्ट्वा वेपमानहृदया वासवदत्तापि तादृशं दुःखं सोढुम् अपारयन्ती भूमौ निपपात । क्षणेन संज्ञाम् आसाद्य भर्तुः दुःखकारणम् आत्मानं बहुधा निनिन्द ।

तस्मिन् काले दम्पत्योः एतयोः तादृशीम् अवस्थाम् अभिवीक्ष्य विलीनहृदयो यौगन्धरायणोऽपि नयनाभ्यां बाष्पम् उत्ससर्ज । तत्र प्रवर्तमानं कोलाहलम् आकर्ण्य पद्मावत्यपि किमिदमिति व्याकुलीभूतहृदया तत्र आजगाम । तदानीं यौगन्धरायणः वत्सराजम् एवम् उवाच ।

देव ! कृत्स्नं भूमण्डलं भवतः वशे कर्तुम् उपायं अचिन्तयम । तस्य मगधराजः एक एव प्रत्यूहः । पद्मावत्याः पाणिग्रहणं विना मगधराजम् अनुकूलयितुं न शक्यम । पद्मावत्याः पाणिग्रहणं साधयितुं मया अयम् उपायः अनुष्ठितः । इतःपरं मगधराजः स्वप्नेऽपि भवते न द्रोक्ष्यति । अहमेव भवतः क्लेशस्य कारणम् । देवी वासवदत्तापि तदर्थम् आनीतेन गोपालकेन अनुबध्यमाना कथं कथमपि अत्र अनुकूला अभवत् । वियोगकाले च इयम् पद्मा-

वत्या समीप एव स्थापिता । तत् पद्मावत्येव अस्याः पातिव्रत्ये साक्षिणी भवति । तत् क्षन्तुमर्हसि भवतः क्लेशदायकं मम इमम् अपराधम् इति ।

तत् श्रुत्वा पद्मावती एवम् आबभाषे-सत्यमाह यौगन्धरायणः । अहम् अस्या वासवदत्तायाः पतिव्रत्ये साक्षिणी । अग्निप्रवेशेनापि एतत् प्रत्याययिष्यामि इति । अथ वासवदत्ता अहमेव आत्मनः पातिव्रत्यं प्रत्याययितुम् अग्निं प्रवेक्ष्यामि इति निश्चयम् अकरोत् । तत् श्रुत्वा यौगन्धरायणः सरभसं सलिलम् आनीय आचम्य प्राङ्मुखः स्थित्वा एवं बभाषे । "हे लोकपालाः ! अहं यदि राज्ञः वत्सराजस्य हिताध्यवसायी, देवी वासवदत्ता च पातिव्रत्यात् अप्रच्युता, तदुभयम् इदानीं बोधयत । नो चेत्, अग्नौ प्राणान् त्यक्ष्यामीति" तद्वचने विरते सद्य एव अशरीरिणी वागेवम् उदभूत् ।

भो, वत्सराज ! धन्यो भवान्, यस्य ते अमात्यगुणपरिपूर्णः यौगन्धरायणः मन्त्री, पतिव्रतोत्तमा प्राग्जन्मदेवता च वासवदत्ता भार्या । तत् मा भूत् तव एतस्याम् अन्यथाशङ्का इति । तत् माकर्ण्य सर्वेऽपि वर्षासु नीलकण्ठाः इव उत्कण्ठाः अतिष्ठन् । अथ वत्सराजः यौगन्धरायणस्य उपायकौशलं बहुधा प्रशशंस । कृत्स्नाञ्च भूमिं स्वहस्तगतां मेने ।

इति पद्मावती परिणयो नाम अष्टमः उच्छ्वासः ।

नवमः उच्छ्वासः

मगधराजसन्धिः ।

——(०)——

अथ द्वित्रेषु दिनेषु व्यतीतेषु मगधराजस्य दूतः आगत्य वत्सराजम् एवं व्यजिज्ञपत् । देव ! राजाधिराजः मगधराजः मन्मुखेन भवन्तम् एव निवेदयति ; "राजन् ! उपायकुशलैः भवतः मन्त्रिभिः वयं वञ्चिताः स्मः । तत् यथा वयं पद्मावतीम् उद्दिश्य न शोचेम, तथा कर्तव्यम" इति । तत् वाक्यं श्रुत्वा वत्सराजः यथोचितं दूतं सम्मानयामास । अथ 'पित्रे संदेशं देहि' इति संदिश्य तं पद्मावत्याः समीप प्रेषितवान् ।

पद्मावती तु तं तातस्य दूतम् आयान्तं दूरादेव विस्मयोत्फुल्लेन लोचनयुगलेन वीक्षमाणा, सप्रणयम् एहि एहि, इत्याहूय 'अपि कुशलम् अम्बायाः तातस्य च' इति पप्रच्छ । दूतस्तु एवं प्रत्युवाच । भर्तृदारिके ! कुशलं देव्याः अम्बायाः महाराजस्य च । अपि तु भवतीं वञ्चनया आनीतां श्रुत्वा शोकाकुला अम्बा स्नानपानाशनादिष्वपि सञ्जातवैराग्या वर्तते । महाराजस्तु भवत्याः सन्देशम् एकं दत्वा मां प्रेषितवान् । यथा 'वासवदत्ता दग्धा' इति मृषा किंवदन्तीं प्रख्याप्य वत्सराजेन त्वं वञ्चनया प्रतिगृहीता ।

वासवदत्ता च वत्सराजस्य प्राणेभ्योऽपि गरीयसी प्रियतमा, इति सुप्रख्यातमेतत्। तत् "कन्यापितृत्वं दुःखाय" इति लोकोक्तेः प्रथमोदाहरणम् आसम्' इति।

तत् श्रुत्वा पद्मावती एवं बभाषे। 'भद्र! मद्वचनात् तातम् एवं ब्रूहि, छद्मना अहम् आनीतापि इह सुखं वसामि। वासवदत्तायाम् अत्यासक्तः इति प्रख्यातोऽपि तव जामाता मयि अतीव प्रीतिमान् वर्तते। वासवदत्तापि भगिनीव मयि निरवधिकं स्नेहम् आबध्नाति। तत् मत्कृते भवद्भिः न शोकः कार्यः" इति। वासवदत्तापि दूतं तं सम्यक् सम्मानयामास। अथ एवं पद्मावत्या सन्देशम् आदाय दूतः मगधराजस्य समीपं ययौ।

अथ पद्मावती पितुः सदनम् अनुस्मृत्य किञ्चित् उत्कण्ठिता बभूव। वासवदत्ता वसन्तकम् आहूय "पद्मावत्याः विनोदाय कथाः कथय" इति उक्तवती। अथ वसन्तकः मनोविनोदिनीः कथाः कथितवान्। कथान्ते च वासवदत्तापद्मावत्यौ दृष्ट्वा एवं बभाषे। "पूर्वस्मिन् जन्मनि युवां भगिन्यौ दिव्यस्त्रियौ केनापि शापदोषेण मनुष्यजन्म अधिगतवत्यौ। तत् युवयोः हृदयं परस्परानुकूलमेव भविष्यति। न कदापि प्रतिकूलाचरणे मतिः उदेष्यतीति"।

तत् श्रुत्वा पद्मावती नितरां हृष्टा बभूव। वासवदत्ता-पद्मावत्योः हृदयम् ईर्ष्यालेशविहीनं परस्परानुकूलम् एकहृदयमिवा-

भूत्। अथ मन्त्री यौगन्धरायणः वत्सराजस्य समीपम् उपेत्य एवं, बभाषे। "देव! इतःपरं महान् उद्योगः कर्तव्यो वर्तते। सद्य एव इदानीं कौशाम्बीं प्रति प्रस्थातुम् उचितम्। मगधराजः अस्माभिः वञ्चितोऽपि नास्माकं प्रतिकूलः भविष्यति। स खलु पद्मावती-पाणिग्रहणसमये "इतः परम् अहं वत्सराजाय न स्वप्नेऽपि द्रोहं करिष्यामि" इति अग्निसाक्षिकं प्रतिज्ञातवान्। किञ्च, अस्माभिः सह विरुध्य प्राणेभ्योऽपि अधिकां पद्मावतीं कथम् उपेक्षेत! अहं मपि चारान् प्रेषयित्वा तस्य हृदयं सम्यक् परिज्ञातवान् अस्मि। तत् सर्वथा मगधराजः अस्माकम् अनुकूलः एव इति निश्चयः। तत् सद्य एव प्रस्थाय कौशाम्बीं गमिष्यामः" इति।

एवं वदति यौगन्धरायणे मगधराजस्य दूतः आजगाम। राज्ञा अनुज्ञातः प्रणम्य एवं विज्ञापयामास। "महाराज! देवस्य मगधराजस्य सन्देशम् आदाय आगतवान् अस्मि। स च दुहितुः पद्मावत्याः सन्देशं दूतमुखेन श्रुत्वा परमानन्दभरितः एवं भवन्तं निवेदयति। "चारमुखेन वत्सायाः पद्मावत्याः सन्देशेन च तत्रत्यं वृत्तान्तं सम्यक् जानीमः। सर्वथा धन्यो भवान्, यस्य ते अनुपमधिषणः यौगन्धरायणः मन्त्री। व्याजेन आहृतापि पद्मावती सुखिनी वर्तते इति श्रुत्वा नितरां हृष्यामः। यदर्थम् एवं संविधानम् आरब्धं, तस्मिन् कार्ये कालविलम्बं विना अवतरतु भवान्। वयमपि तत्र साहाय्यम् आचरिष्यामः" इति।

तत् श्रुत्वा वत्सराजः मनसि अमान्तम् आनन्दम् अन्तः नियम्य "धन्याः वयम् भवताम् साहाय्येन, यथानिर्दिष्टं करिष्यामः" इति प्रतिसन्दिश्य, तं दूतं सम्यक् सम्मान्य विसर्ज। दूतः मगधराजस्य राजधानीं प्रति प्रययौ। तस्मिन्नेव समये उज्जयिनीनगरात् चण्डमहासेनेन प्रहितः दूतः आजगाम। सोऽपि वत्सराजेन प्रवेशितः प्रणामानन्तरम् एवं निवेदयामास।

देव! महाराजः चण्डमहासेनः सस्नेहं भवन्तम् एवं निवेदयति। "पद्मावतीपरिणयप्रमुखानि सर्वाणि भवदीयानि अपदानानि सम्यक् अवगतवान् अस्मि। सर्वथा भवान् भाग्यवान्, यस्य ते यौगन्धरायणः मन्त्री। वत्सा वासवदत्तापि नितरां धन्या, या पत्युः हितैषितया आत्मदुःखम् अविगणय्यापि अज्ञातवासदौस्थ्यम् अनुभूय। किञ्च, वासवदत्तापद्मावत्योः परस्परानुकूलतां श्रुत्वा नितरां नन्दामि। तत् युष्माभिः अभीप्सितस्य साधने विना विलम्बम् उद्योगः क्रियताम्। तत्र वयमपि सहायाः भविष्यामः" इति। तत् श्रुत्वा वत्सराजः चण्डमहासेनस्य यथोचितं प्रतिसन्दिश्य दूतं सम्मान्य प्रतिप्रस्थापयामास।

अथ यथा यौगन्धरायणेन उक्तम् तथैव वासवदत्तापद्मावतीभ्यां सह कौशाम्बीं प्रति प्रतस्थे। वेलातिगानि जलनिधिजलानीव अपरिमेयानि बलानि तम् अन्वयुः। गजेन्द्रस्य स्कन्धम् आरुह्य गच्छन् वत्सराजः उदयाचलशृङ्गम् आरूढः दिवाकरः इव

रराज। वासवदत्तापद्मावत्यौ अपि पश्चात् अन्यां करेणुकाम् अधिरुह्य तम् अनुजग्मतुः। एवं वत्सराजस्य आगमनं श्रुत्वा सकुतूहलाः नगरवासिनः जना कौशाम्बीनगरम् अलंचक्रुः। सर्वत्र ध्वज-पटान् नीरन्ध्रम् उच्छ्रायया मासुः। प्रतिगृहं विचित्राः तोरणमालाः बबन्धुः। प्रतिगृहद्वारम् उत्तुङ्गान् पूर्णकुम्भान् स्थापयामासुः। एवं गर्वैः पौरैः अभिनन्दितागमनः वत्सराजः कौशाम्बीं प्रविवेश। तदानीं सर्वत्र कोलाहलिभिः पौरैः आकीर्णा कौशाम्बीनगरी चन्द्रोदयकाले उत्तरङ्गा समुद्रवेलेव अशोभत। एवं नगरवासिनां जनानां नयनानि आनन्दयन् वत्सराजः वासवदत्तापद्मावतीभ्यां सह स्वं मन्दिरम् अवाप।

इति नवमः उच्छ्वासः।

अथ सिंहासनप्राप्तिर्नाम

दशम उच्छ्वासः।

अथ अपरेद्युः प्रभाते वत्सराजः प्राभातिकं विधिं परिसमाप्य मन्त्रिभिः सह आस्थानमण्डपम् अलंचकार। तदानीं कश्चित् ब्राह्मणः द्वारदेशम् आगत्य 'अब्रह्मण्यम् अब्रह्मण्यम्' इत्याचक्रन्द। वत्सराजेन शोककारणं पृष्टः सः एवम् अब्रवीत्। "राजन्! वनं

गच्छतः निरपराधिनः मम पुत्रस्य चरणं पापाः गोपालकाः चिच्छिदुः" इति । तत् श्रुत्वा वत्सराज. ब्राह्मणं मान्वयित्वा तत्क्षणमेव तान् गोपालकान् आनाययामास । आनाय्य च ' कुतः एवम् अन्याय्यम् आचरितम् ?' इति पप्रच्छ । ते एवं विज्ञापयामासुः ।

"देव ! गोपालकाः वयं विजने वने क्रीडन्त. आस्म । अस्मासु एकः देवसेनो नाम गोपालकः अस्ति । स च वनैकदेशे शिलामयम् एकम् आसनं दृष्ट्वा तत्र उपविवेश । उपविष्टमात्र एव " अहम् इदानीं गोपालकानां राजा अस्मि, तत् इतः परं युष्माभिः सावधानैः मम आज्ञायां वर्तितव्यम्" इति अस्मान् अनुशशास । अस्माभिरपि तत् तथैव अभ्युपगतम् । तत. प्रभृति तस्य आज्ञा नास्माभिः अतिलंघ्यते । स एवम् अरण्ये राज्यं करोति । तदानीं अस्य ब्राह्मणस्य तनयः तेन मार्गेण गच्छन् आसीत् । अस्माकं राज्ञ देवसेनस्य प्रणामं नाकरोत् । वयं तम् उपसृत्य "राजानम् अप्रणम्य त्वया न गन्तव्यम्" इति अवोचाम । सः एवं बहुशः अनुशिष्टोऽपि अस्मान् अनादृत्य आयासीत् । तत. सर्वे वयं तं बलात् आकृष्य राज्ञः समीपम् अनैष्म । सः अस्माकं राजा "अस्य दुर्विनीतस्य चरणं छिन्त" इति अस्मान् आज्ञापयामास । ततः वयं राजादेशम् अन्वतिष्ठाम । राजादेशम् अतिलङ्घयितुं कथं शक्नुयाम" इति ।

एवं गोपालकानां वचनं श्रुत्वा धीमान् यौगन्धरायणः सुचिरं मनसि विचार्य वत्सराजं रहसि आहूय एवम् अब्रवीत्। "देव! नूनम् अपरिमितः निधिः तस्मिन् स्थाने वर्तते। यस्य प्रभावेण गोपालकोऽपि राजवत् आचरितुं प्रभवति। तत् सद्य एव प्रस्थाय तत् स्थानं गत्वा परीक्षितव्यम्" इति। वत्सराजः तथेति अभ्युपगम्य तत्क्षणम् एव प्रस्थाय गोपालकैः प्रदर्शितेन मार्गेण तत् स्थानं ययौ। ततः तं प्रदेशं कर्मकरैः खानयामास। तस्मात् प्रदेशात् शैलाकृतिः कश्चित् यक्षः उत्तस्थौ।

सोऽब्रवीत् "राजन्! तव पूर्वपितामहैः निक्षिप्तः महान् निधिः इह वर्तते। तं संरक्षितुम् एतावन्तं कालम् इह अवात्सम्। तं प्रतिगृह्णीष्व, गमिष्यामि" इति। तत् श्रुत्वा परमानन्दभरितः वत्सराजः यक्षस्य निरवधिकां पूजां कारयामास। तां पूजां प्रतिगृह्य यक्षः तिरोहितः बभूव। ततः खातात् तस्मात् प्रदेशात् महान् निधिः आविरभूत्। तत्र महार्हं रत्नखचितं सिंहासनम् अपि अदृश्यत। अभ्युदयकाले हि पुरुषम् उपर्युपरि कल्याणपरम्पराः स्वयम् आगच्छन्ति। ततः वत्सराजः गोपालकान् "इतः परम् भवद्भिः एवमादि अविनयकार्यं न कर्तव्यम्" इत्यनुशशास। अथ च विससर्ज।

अथ सर्वं निधिजातम् आदाय स्वपुरीं प्रति प्रतस्थे। तत् रत्नखचितं सिंहासनम् अभिवीक्ष्य कौशाम्बीनगरवासिनः जनाः नितराम् व्यस्मयन्त। परेद्युः यौगन्धरायणः वत्सराजम् एवं निवेदयामास। "देव! तव पूर्वैः अधिष्ठितं रत्नसिंहासनम् आरुह्य अलं-

क्रियताम्" इति। तस्य वत्सराजः एवं प्रत्युवाच। 'मम पूर्वे राजानः कृत्स्नां भूमिं स्वबाहुबलेन विजित्य सिंहासनम् इदम् आरूढवन्तः। अहमपि सर्वाः दिशः विजित्यैव सिंहासनम् इदम् आरोढुम् इच्छामि। तत् इदानीमेव चतुस्सागरपर्यन्तां भूमिं विजेतुं प्रस्थातव्यम्" इति।

यौगन्धरायणः तत् वाक्यम् अभिननन्द। अथ "प्रथमं प्राचीं दिशं प्रति प्रतिष्ठस्व" इत्यवोचत्। तत् श्रुत्वा वत्सराजः एवं पप्रच्छ। कथम् उत्तराद्यासु दिक्षु विद्यमानासु प्राचीं प्रत्येव प्रथमं गन्तव्यम् इति नियमः क्रियते इति। तस्य यौगन्धरायणः एव प्रत्युत्तरं ददौ।

"देव! श्रूयताम्। चतसृषु दिक्षु उत्तरा दिक् समृद्धापि म्लेच्छैः आक्रान्तत्वात् गर्हिता। प्रतीची दिगपि सूर्यास्तमयहेतुत्वात् न प्रशस्ता। दक्षिणा दिगपि वैवस्वतेन परिगृहीतत्वात् न श्लाघ्या। प्राच्यां दिशि तु भगवान् अंशुमाली उदेति। तामेव सर्वदेवानाम् ईश्वरः मघवा अधिवसति। सर्वलोकपावनी विष्णुपादोद्भवा जाह्नवी च प्राचीं दिशं प्रति प्रवहति। किमुच्यते जाह्नवीमहिमा। सर्वेषु देशेषु जाह्नवीजलपूतः यः देशः सः प्रशस्यते। प्रायेण बहवः राजानः जाह्नवीतीरवर्तिष्वेव देशेषु निवसन्ति। तस्मात् श्रेयोर्थिनः राजानः प्रथमं प्राचीं दिशं प्रति प्रयान्ति। तव पूर्वजाः अपि प्राचीमारभ्यैव सर्वाः दिशः विजिग्युः। जाह्नवीतीरवर्तिनि हस्तिनापुरे न्यवसन्। तव पितामहः शतानी-

कन्तु हस्तिनापुरं विहाय कौशाम्बीम् आजगाम । हस्तिनापुरापेक्षया रमणीयतरा हि कौशाम्बीनगरी । शतानीकः 'पौरुषाधीनं साम्राज्यं, दैवं किं करिष्यति' इति मन्वानः पूर्वपरिगृहीतामपि हस्तिनापुरीं अहापीत् । भवतः इदानीं दैवम् अनुकूलम् । पौरुषं सम्पन्नम् । तत् शीघ्रमेव दिग्विजयाय प्रस्थीयताम् " इति ।

इत्येवं यौगन्धरायणस्य वचनं श्रुत्वा वत्सराजः प्रत्युवाच । " मन्त्रिन् ! श्रेयांसि बहुविघ्नानि " इति श्रूयते । अतः विघ्नान् अपाकर्तुं प्रथमं भगवन्तं भवानीपतिम् आराधयितुम् इच्छामि" इति । यौगन्धरायणोपि 'तथैव क्रियताम्' इत्यनुमेने । अथ इतरैः मन्त्रिभिरपि अनुमतः वत्सराजः वासवदत्तापद्मावतीभ्यां सह स्नानपूतः त्रिरात्रम् उपोष्य भगवन्तं भवानीपतिम् आराधयामास । अथ व्रतान्ते स्वप्ने भगवान् आविर्भूय एवम् आदिदेश । "राजन्! तव अनेन अनवद्यभक्तिकृतेन आराधनेन परितुष्टोस्मि । निर्विशङ्कं दिग्विजयाय प्रतिष्ठस्व । निष्प्रत्यूहं जयम् अवाप्स्यसि । विद्याधरचक्रवर्तिनं पुत्रञ्च अचिरात् अवाप्स्यसि " इति । ततः प्रबुद्धः वत्सराजः परमानन्दभरितः बभूव । प्रभाते स्वप्नवृत्तान्तम् इमम् उपवासकृशाभ्यां देवीभ्यां शशंस । अथ मन्त्रिभ्यः बभाषे । तत् श्रुत्वा सर्वेऽपि परां कोटिम् आनन्दस्य अवापुः । अथ वत्सराजः व्रतं परिसमाप्य पारणाम् अकरोत् ।

इति दशमः उच्छ्वासः ।

अथ दिग्विजयो नाम

एकादश. उच्छास. ।

अथ अन्येद्युः यौगन्धरायण वत्सराजम् एवम् अब्रवीत । 'देव ! भगवतः भवानीपतेः अनुग्रहेण त्वं भाग्यवान् असि । तत इदानीमेव दिग्विजयाय प्रतिष्ठस्व । भुजबलेन आर्जितां साम्राज्य-लक्ष्मीं लभस्व । स्वधर्मार्जिता सम्पदो हि अविनाशिन्यः । अन्या-यार्जिताः सम्पदस्तु तृणाग्रभग्नाः तुषारबिन्दव इव क्षणेन नश्यन्ति । तस्मात् राज्ञा धर्मेण धनार्जने यत्नः कर्तव्यः । तव इदानीं सर्वाः दिशः सुखेन जय्याः । भवतः उभयोः श्वशुरयोः सम्बन्धेन बहवः राजानः बन्धवः भवन्ति । सर्वे ते दिग्विजयाय प्रस्थितेन भवता सह न विरोत्स्यन्ति । किन्तु अनुकूला एव भविष्यन्ति । योऽयं वाराणस्यां ब्रह्मदत्तो नाम राजास्ति, सः केवल प्रथमं चिन्तनीयः । सः भवतः नित्यवैरी । तं प्रथमं जित्वा ततः प्राचीम् आरभ्य सर्वाः दिशः विजयस्व' ।

इत्येवं यौगन्धरायणस्य वचनं श्रुत्वा वत्सराजः सेनापतिम् आहूय 'सद्य एव दिग्विजययात्रासन्नाहः क्रियताम्' इत्यादिदेश । तदानीं वासवदत्तायाः सहोदरः गोपालकः, पद्मावत्याः सहोदरः

सिंहवर्मा च मा ख्याय त अनुजगमतु । वत्सराजः गोपालकं वद-
हेषु राजानम् अकरोत् । चेदिराज्यञ्च सिंहवर्मणे प्रायच्छत् । अथ
स्वस्य साहाय्यकरणाय विन्ध्याटवीमध्यात् निषादाधिपतिं पुलिन्दकं
सपरिवारं आनाययामास ।

अत्रान्तरे यौगन्धरायणः ब्रह्मदत्तस्य विचेष्टितं परिज्ञातुं
वाराणसीं प्रति दूतान् प्रेषयामास । ते च कापालिकवेषं धृत्वा
वाराणसीं प्रापुः । तेषु एकः कुहकनामा आचार्यवेषं धृतवान् । इतरे
तस्य शिष्याः अभूवन् । ते च तं भिक्षाशिनं कपटगुरुं 'त्रिकालज्ञः'
इति ख्यापयामासुः । ते च सर्वे वाराणसीनगरवासिनः जनाः भावीनि
शुभाशुभानि द्रष्टुं मदनाम उपसेदुः । सर्वं समाधिदृष्ट्या
पश्यन्निव अभिनयन कपटगुरुः तेषां जनानाम्, अत्र अग्निदाहः
भविष्यति, अत्र चौर्यं भविष्यति, इत्यादि यत् यत् ब्रूते, तत् तत्
शिष्याः तथ्यमेव अकुर्वन् । तेन तस्य महती प्रख्यातिः पप्रथे ।
तस्मिन् समये वत्सराजस्य दिग्विजययात्रासंनाहं चारमुखात् विदि
त्वा ब्रह्मदत्तः नितरां कलुषितहृदयः आस्त । तदानीम् एनम् अत्या-
श्चर्यमहिमानं कापालिकव्रतिनम् आगतं श्रुत्वा तम् उपासितुम् आ-
त्मनः पुत्रम् एकं प्रेषितवान् । स च कपटगुरुः त राजपुत्रं
मुख्यशिष्यत्वेन अङ्गीचकार । अथ तन्मुखेन ब्रह्मदत्तस्य सर्वाणि
रहस्यानि अधिजगाम ।

यथा वा—'वत्सराजः प्रथम वाराणसीम् अभिषेणयिष्यति'
इति विदित्वा योगकरण्टको नाम ब्रह्मदत्तस्य मन्त्री बहूनि कैतवानि

प्रयुक्तवान्। मार्गे वृक्षान् लताः सल्लिानि तृणानि च विषसंसर्गम् उत्पाद्य दूषितवान। वेश्यारूपधारिणीः विषकन्यकाः तत्र तत्र स्थापयामास। निशासु कटकं प्रविश्य छद्मना सैनिकान् घातयितुं घातकान् पुरुषान् नियोजयामास। एवं ब्रह्मदत्तमन्त्रिकृतान् कपटप्रयोगान् परिज्ञाय कपटकापालिकः दूतमुखेन यौगन्धरायणं बोधयामास।

अथ वत्सराजः ज्योतिर्विदः निर्दिष्टे शुभे मुहूर्ते सैन्यैः प्रतस्थे। तदानीं तस्य विजयसूचकानि शुभानिमित्तानि प्रादुर्बभूवुः। कृत्स्नं भूमण्डलम् आच्छाद्य प्रतिष्ठमानम् अपरिमेयं तस्य बलं प्रलयकाले वेलाम् अतिक्रान्तं जलनिधिजठरमिव अदृश्यत। अत्युन्नतस्य गजस्य स्कन्धम् आरूढः वत्सराजः प्रभाते उदयपर्वतस्य शृङ्गम् अधिरूढः दिवाकर इव विरराज। प्रथमं प्राचीं दिशं प्रतिष्ठितः वत्सराजः वाराणसीम् अभिजगाम।

पूर्वमेव ब्रह्मदत्तस्य मन्त्रिणा रोमकरण्टकेन विहितानि कैतवानि विदितवान् यौगन्धरायणः प्रतिप्रयोगेण तानि निष्फलानि अकरोत्। विषसंसर्गेण दूषितानि तृणजलादीनि प्रतिप्रयोगेण शोधयामास। विषकन्यकानां उपरोधं प्रशमयितुं अदृष्टपूर्वाणां वनितानां प्रवेशं शिबिरे निषिषेध। छद्मघातकान् पुरुषान् उपायैः विचित्य घातयामास। एवं यौगन्धरायणः शत्रोः कैतवप्रयोगान् निष्फलीकृत्य वत्सराजस्य विजययात्रां निष्प्रत्यूहां अकरोत्। एवम् उत्तीर्णप्रत्यूहम् अपरिमेयैः सैन्यैः दिशामुखानि आपूर्य आग

च्छन्तं वत्सराजम् अभिवीक्ष्य किंकर्तव्यताशून्यहृदयः ब्रह्मदत्तः मन्त्रिभिः सह सम्मन्त्र्य 'दुर्जयः वत्सराजः' इति निश्चितवान्। अथ बहूनि उपायनानि आदाय अञ्जलिं शिरसि आधाय वत्सराजं उपजगाम। शरणागतवत्सलो वत्सराजः तं ब्रह्मदत्तं प्रीत्या सम्मान्य विससर्ज।

एवं वत्सराजः विनीतान् प्रीत्या अनुगृह्य अवलिप्तान् समूलं उन्मूल्य तत्र तत्र जयस्तम्भान् स्थापयन् प्राच्यस्य महोदधेः वेलाम् अवाप। ततःमहेन्द्रनाथं कलिङ्गम् अभिजगाम। सोऽपि वैतसीं वृत्तिं आश्रित्य महेन्द्रप्रभवान् असंख्यातान् गजान् उपायनानि समर्प्य प्रणनाम। तदनन्तरं वेलातटेनैव दक्षिणां दिशं जेतुं प्रतस्थे। तत्र कावेरीं तीर्त्वा चोलराजं जिगाय। अथ मुरलायाः तीरम् आस्कन्द्य विनीतान् केरळान् अनुजग्राह। अथ सप्तधा भिन्नां गोदावरीम् उत्तीर्य नर्मदायाः तीरे त्रिंशत्रि दिनानि उवास। अथ तामपि उत्तीर्य उज्जयिनीनगराभिमुखं प्रस्थित चण्डमहासेनेन सादरं प्रत्युद्गम्य अभिनन्दितागमनः उज्जयिनीं प्रविवेश। तत्र स्वदेशविस्मारकं श्वशुरगृहवासौख्यम् अनुभवन् कतिपयान् दिवसान् अयापयत्।

ततः पश्चिमां दिशं प्रति प्रस्थितः लाटदेशाधिपतीन् जिगाय। ततः मन्दरं पर्वतम् अतिलङ्घ्य उदीचीं दिशं ययौ। तत्र सिन्धुराजं स्वशासने स्थापयित्वा अवलिप्तान् म्लेच्छान् विद्रावयामास। ततः पारसीकान् गत्वा अविनीतस्य पारसीकराजस्य

शिरः निशितैः शरैः छित्वा पातयामास। अथ हिमालयप्रान्तवर्तिनः हूणान् नमयामास। ततः परं कामरूपेश्वरः वत्सराजम् अपनीतातपत्रेण शिरसा प्रणम्य करं समर्पयामास।

एवं वत्सराजः कृत्स्नां वसुधां विजित्य पद्मावतीजनकस्य मगधराजस्य राजधानीं जगाम। मगधराजश्च सर्वेषु देशेषु अप्रतिहतपराक्रमं वासवदत्तापद्मावतीभ्यां समम् आगच्छन्तं जामातरं वीक्ष्य नितराम् अभिननन्द। पूर्वम् अन्तःपुरे अविज्ञातम् उषिताम् इदानीं साक्षात् आगतां वासवदत्तां सर्वा अन्तःपुरस्त्रियः सविस्मयं सबहुमानञ्च अवलोकयामासुः। तत्र मगधराजेन सविशेषं सत्कृतः वत्सराजः ततः प्रस्थाय लावाणकं जगाम। सैन्यानां विश्रमार्थं कतिपयान् दिवसान् तत्र स्थितवान्। अनन्तरम् अपनीतयात्राश्रमाणि सैन्यानि आदाय कौशाम्बीं प्रति प्रययौ। जयश्रिया भासमानं राजानं साक्षात्कर्तुं सकुतूहलैः पौरैः तोरणादिभिः अलकृतां सर्वतः समुच्छ्रितपताकां कौशाम्बीं प्रविवेश।

अथ पौरैः मन्त्रिभिश्च अनुमतः शुभे मुहूर्ते रत्नसिंहासनम् आरुरोह। तदानीं दिग्विजयेन अर्जितं सर्वं धनजातं ब्राह्मणेभ्यः वितनार। एवं स्वबाहुबलेन संपादितया साम्राज्यलक्ष्म्या शोभमानः वत्सराजः रुमण्वति यौगन्धरायणे च समस्तं राज्यभारं निक्षिप्य वासवदत्तापद्मावतीभ्यां सह रममाणः अमरैरपि स्पृहणीयं सौख्यम् अनुभवन् कालम् अतिवाहयाञ्चक्रे।

इति एकादशः उच्छ्वासः

अथ नरवाहनदत्त जननं नाम

द्वादशः उच्छ्वासः ।

राज्यचिन्तारहितः वत्सराजः कदाचित् वसुनेमिदत्तां वीणां वादयन् कालं यापयामास । कदाचित् मृगयाम अटन् मनः विनोदयामास । कदाचित् वीणानिर्विशेषेण कण्ठध्वनिना गायन्याः वासवदत्तायाः संगीतकलाकौशलं शिरःकम्पेन अभिननन्द । कदाचित् सरागालापकुशलया पद्मावत्या सह रममाणः बहुतिथं कालं क्षणमिव गमयामास ।

अथ राज्यचिन्तां विस्मृत्य मृगयाव्यसनी सर्वदा अटव्यां परिबभ्राम । तत् विज्ञाय नारद समाजगाम । वत्सराजः तं दूरादेव दृष्ट्वा झटिति आसनात् उत्थाय प्रत्युज्जगाम अथ च स्वहस्तानीते आसने तम् उपवेश्य विधिवत् उपचचार । विनीतेन वत्सराजेन क्रियमाणम् आतिथ्यं प्रतिगृह्य नारदः एवं बभाषे । 'राजन् ! हितैषितया तव किञ्चित् उपदेष्टुम् इह आगतोऽस्मि । मृगयायाम् अत्यासक्तिः राज्ञां महान् दोषः । तेन बहवः राजानः विपदम् अवापुः । तव पूर्वपितामहः पाण्डुर्नाम राजा बभूव । स च भवानिव मृगायायाम् अत्यासक्तः आसीत् । मृगयाम् अटन् वनेषु मृगरूपेण चरन्तं किन्दमनामधेयं मुनिम् अवधीत् । तस्य शापेन पाण्डुः यौवने वयस्येव दिष्टान्तम् अवाप । तत् अनर्थावहां मृग-

यामक्तिं त्यज । वासवदत्तया सह भगवन्तं भवानीपतिम् आराधय । तस्य अनुग्रहेण कामदेवस्य अंशभूत पुत्रस्ते भविष्यति । स च विद्याधरचक्रवर्ती भविष्यति ।' इत्युक्त्वा नारदः वत्सराजम् आमन्त्र्य ययौ ।

अथ वत्सराजः वासवदत्तया सह त्रिरात्रम् उपोषितः शम्भुम् अराधयामास । शम्भुः तयोः स्वप्ने आत्मानं दर्शयामास । अथ च एवम् आदिदेश । "तुष्टोऽस्मि भवतोः आराधनेन । अचिरादेव कामदेवस्य अंशभूतं पुत्र लप्स्येथे तत् व्रतं ममापयतम् " इति । इत्युक्त्वा महेश्वर तिरोहितः बभूव ।

अथ प्रबुद्धौ वासवदत्तावत्सराजौ महान्तं प्रमोदम् अवापतु । अथ यथाविधि व्रतं परिसमाप्य पारणां निर्वर्तयामासतुः । अथ कतिपयदिवसापगमे रात्रौ गाढसुप्तां वासवदत्तां कश्चित् जटाधरः दिव्य पुरुषः उपसृत्य दिव्यम एकं फलं तस्यै दत्वा सद्यः तिरोदधे । वासवदत्ता तं स्वप्नं वत्सराजाय निवेदयामास । भगवान् महेश्वर एव फलव्याजेन पुत्रं दत्तवान् इति विचिन्त्य वत्सराजः परममानन्दम् अवाप । अथ वासवदत्ता गर्भं दधौ । तस्याः मुखं पाण्डुरम् अभूत् । शरीरञ्च कृशम् अभूत् । कदाचित् सा स्वप्ने आत्मानम् आकाशे विमानेन नीयमानां, श्रवणसुभगं गायन्तीभिः विद्याधरकन्यकाभिः उपास्यमानां दृष्टवती । प्रबुद्धा सा तत् साक्षात् अनुभवितुम् अभिलषाय । यौगन्धरायणश्च स्वस्य इन्द्रजालविद्या-

कौशलेन तस्याः मनोरथम् पूरयामास। वासवदत्तायाः उदरे गर्भः क्रमेण ववृधे। तस्याः मध्यम् स्थूलम् अभूत्। वलित्रयञ्च शनैःशनैः तिरोदधे। तञ्च गर्भं सर्वदा सन्निहितः शूलहस्तः भगवान् शङ्करः ररक्ष।

अथ दशमे मासि वासवदत्ता आसन्नप्रसवा बभूव। शुभे मुहूर्ते रत्नमये दीपैः हरिद्रादिभिः मङ्गलद्रव्यैश्च परिष्कृतं प्रसवगृहं प्रविवेश। तत्र चन्द्रमिव नयनानन्दकरं कुमारं सुषुवे। तदानीम् अन्तःपुरवासिनः सर्वे परिजनाः सरभसम् अहमहमिकया धावित्वा वत्सराजाय पुत्रजन्म निवेदयामासुः। तत् श्रुत्वा परमानन्दभरितः वत्सराजः परिजनेभ्यः महार्हाणि रत्नानि वितनार। अथ मनोरथातिलङ्घिभिः भूरिदानैः ब्राह्मणान् परितोषयामास।

अथ माम्रज्यलक्ष्मीलक्षणैः उपलक्षितं प्राभातिकेन बालातपेन प्रबोधितं पुण्डरीकमिव बिभ्राजमानम् अरुणाधरम् आत्मजं ददर्श। दृष्ट्वा च पूर्णिमाचन्द्रदर्शनेन महोदधिरिव आत्मनि अमान्तम् आनन्दम् अवाप। अथ शान्तिकरनामा अस्य पुरोहितः कुमारस्य जातकर्मादिकं क्रियाकलापं सर्वं निर्वर्तयामास। तदानीम् अकस्मात् अशरीरिणी वागेवमुच्चचार। "राजन्! कामदेवस्य अंशेन अवतीर्णः अयं तव आत्मजः नरवाहनदत्तो नाम। अयम् अचिरादेव विद्याधराणां चक्रवर्ती भविष्यति" इति। तदानीम् आकाशात् पुष्पवृष्टिः पपात। देवदुन्दुभीनां निनादः शुश्रुवे। अथ सर्वे

नगरवासिनः राज्ञः पुत्रोत्सवम् अभिननन्दुः । तस्मिन् समये कृत्स्नापि कौशाम्बी उत्सवमयी बभूव । वत्सराजश्च यथा आकाशवाण्या उपदिष्टं तथैव कुमारस्य अस्य 'नरवाहनदत्त' इति नाम चक्कार ॥

नरवाहनदत्तः शुक्लपक्षशशिकलेव शनैः शनैः ववृधे । तस्य च निर्निमित्तानि दशनशून्यानि स्मितानि वत्सराजम् आनन्दपरवशम् अकुर्वन् । सकललोकलोचनानन्दकरस्य तस्य जानुचङ्क्रमणानि सामन्तमहीपतीनामपि हृदयानि आनन्दयामासुः । अथ कदाचित् नरवाहनदत्तस्य परेभ्यः पापम् आशङ्कमानः वत्सराजः भृशम् उन्मनी बभूव। तत् विज्ञाय यौगन्धरायणः रहसि तम् उपसृत्य एवम् अब्रवीत् ।

देव ! भवतः कुमारस्य नरवाहनदत्तस्य संरक्षणम् अधिकृत्य माभूत् ते किञ्चिदपि चिन्ता । भगवान् भवानीपतिः कुमारम् इमम् विद्याधरचक्रवर्तिनं भाविनं संकल्प्य अवतारयामास । इमं वृत्तान्तम् अभिज्ञाय केचित् विद्याधराः कुमारेस्मिन् पापम् आचरितुम् व्यवसितवन्तः । ततः निर्व्याजकरुणानिधिः सः भगवान् स्तम्भकं नाम गणाधिपं कुमारस्य अस्य संरक्षणाय प्रेषितवान् । स च स्तम्भकः कुमारम् इमम् अभिरक्षन् अत्रैव परैः अलक्षितः तिष्ठति । इममर्थं कदाचित् भगवान् नारदः समागत्य माम् अबोधितवान्, इति । तत् श्रुत्वा वत्सराजः निश्चिन्तः बभूव ।

एवं वत्सराजेन अभिवर्धितः शुक्लपक्षचन्द्रकलेव शनैः शनैः उपचीयमानावयवः नरवाहनदत्तः यथाकालं चौलोपनयनादिभिः क्रियाकलापैः संस्कृतः बभूव । सवयोभिः मन्त्रिकुमारैः सहितः सकलाः कलाः जग्राह । विनयादिभिः सद्गुणैः नितरां शोभमानः नरवाहनदत्तः क्रमेण सर्वासु विद्यासु प्रावीण्यं प्रतिपेदे । अथ अतिक्रान्तशैशवस्य नरवाहनदत्तस्य विवाहं प्राप्तकालम् अमन्यत वत्सराजः ।

इति द्वादशः उच्छ्वासः



अथ कलिङ्गसेनोदन्तो नाम

त्रयोदशः उच्छ्वासः

अस्ति अभ्रंकषैः सौधैः परिवृता तक्षशिला नाम नगरी । तस्यां कलिङ्गसेनः नाम राजा बभूव । तस्य च तारादत्ता नाम महिषी । तयोः चिरात् अपत्यं न जज्ञे । तेन भृशं दुःखितः कलिङ्गसेनः कथं कथमपि कालं यापयन् आस्त । अत्रान्तरे देवलोके कश्चित् महोत्सवः समवर्तत । तत्र सर्वाः अप्सरसः नर्तितुम् समम्मिळन् । सुरभिदत्ता केवलं नाजगाम । सा च स्वेच्छया केनापि विद्याधरेण सह नन्दने विहरन्ती आसीत् । तत् विज्ञाय देवेन्द्रः तां शशाप । 'पापे! गच्छ मनुष्यलोकम्' इति । सा च तं शापं

परिज्ञाय सरभसम् आगत्य देवेन्द्रस्य पादयोः निपत्य, 'देव ! क्षमस्व अपराधम्' इति प्रार्थितवती । दयालुः देवेन्द्रः 'एकां दुहितरम् उत्पाद्य पुनः इह आगमिष्यसि' इति अनुजग्राह । सा सुरभिदत्ता तारादत्तायाः उदरं गर्भरूपेण प्रविवेश ।

अथ कस्याश्चित् अर्धयामावशेषायां रजन्याम् तारादत्ता स्वप्ने आकाशात् परिभ्रष्टां ज्वालां स्वोदरं प्रविशन्तीं ददर्श। प्रातः प्रबुध्य तं स्वप्नं भर्त्रे निवेदयामास । सोऽपि तं स्वप्नं श्रुत्वा नितरां ननन्द । सद्य एव तारादत्ता गर्भं दधौ । दशमे मासि तटिल्लतासमानकान्तिं कन्यकां प्रासूत । शरत्कालचन्द्रिकामिव सर्वजननयनानन्दकरीं तां तनयां दृष्ट्वा परमानन्दभरितः कलिङ्गसेनः 'कलिङ्गसेना' इति नाम्ना आजुहाव । शुक्लपक्षचन्द्रकलेव प्रतिदिनम् अभिवर्धमाना सा कलिङ्गसेना गृहाङ्गणेषु सौधेषु उद्यानेषु च विहरन्ती क्रमेण शैशवम् अतिचक्राम ।

अथ कदाचित् आकाशे देवयानेन संचरमाणा मयासुरस्य दुहिता सोमप्रभा प्रासादस्य उपरि सखीभिः सह विहरन्तीम् कलिङ्गसेनां ददर्श। अस्याश्च दिव्यं सौन्दर्यं दृष्ट्वा एवं चिन्तयामास । अहो 'अस्याः कन्यकायाः मर्त्यलोकदुर्लभं सौन्दर्यम् । किमियं दैवी; नागकन्यका; साक्षात् लक्ष्मीर्वा; नूनम् इयं केनापि शापदोषेण भुवम् अवतीर्णा देवयोषा स्यात् । किञ्च, अनया प्राग्जन्मनि मम वयस्यया भाव्यम्, यत् दर्शनमात्रेण अस्याः नितरां प्रीयते मम अन्तरात्मा । तत् अनया सह मैत्री

संपादनीया । यदि झटिति अस्याः समीपं गमिष्यामि, तदा भीता भविष्यति' । इति मनसि विचार्य सा सोमप्रभा शनैः शनैः विमानात् अवतीर्य मानुषस्त्रीवेषं धृत्वा कलिङ्गसेनायाः समीपम् उपजगाम । कलिङ्गसेनापि तां सोमप्रभां दृष्ट्वा, 'आः, किम् इदम् आश्चर्यम् । कथम् इयं मानुषकन्यका स्थानम् इदम् आसादितवती इति' उक्त्वा सरभसम् उत्थाय 'प्रत्युद्गम्य 'एहि, एहि' इति प्रसारितकरा ताम् आलिलिङ्ग । अथ स्वयम् सरभसम् धावित्वा आसनम् उपजहार । आसने च ताम् उपवेश्य तस्याः नामधामादिकं पप्रच्छ । ततः तयोः मिथः संभाषणं प्रवृत्तम् । तेन तयोः सुदृढं सख्यं संजातम् । सोमप्रभा तु तत्र कञ्चित् कालं स्थित्वा 'सखि कलिङ्गसेने ! मम निवासः इतः योजनानां षष्टेः परं वर्तते । सूर्यश्च अस्तं गच्छति । तत् अनुजानीहि माम्' इति उक्त्वा उत्थाय विमानम् आरुह्य प्रययौ ।

कलिङ्गसेना तु सोमप्रभामार्गम् एव अनिमिषाभ्याम् लोचनाभ्यां पश्यन्ती, दृष्टिपथम् अतिक्रान्ते विमाने, 'अहो ! किमिदम् आश्चर्यम् देवस्त्रिया सह मम सख्यं सञ्जातम्' इति विस्मयपरवशा बभूव । ततः सोमप्रभास्मरणेनैव सर्वीं रात्रिं क्षपयामास । परेद्युः प्रभाते पुनरपि सोमप्रभा कलिङ्गसेनायाः समीपम् उपजगाम । उपसृत्य च विचित्राभिः दारुमयीभिः पुत्रिकाभिः पूर्णां पेटिकां कलिङ्गसेनायै दत्तवती । कलिङ्गसेना तु किम् अस्यां पेटिकायां वर्तते ? इति पप्रच्छ; सोमप्रभा पेटिकाम् उद्घाट्य दर्शयामास । तत्र काश्चित् पुत्रिकाः पुष्पमालाः ग्रथ्नन्ति; काश्चित् पानीयम् उपहरन्ति; काश्चित् नृत्यन्ति;

काश्चित् गायन्ति; काश्चित् वीणां वादयन्ति, एवं विचित्राः पुत्रिकाः दृष्ट्वा कलिङ्गसेना मनसि अमान्तम् आनन्दम् अवाप। अथ सोमप्रभा कलिङ्गसेनाम् आमन्त्र्य स्ववासं प्रति प्रययौ। एवं सोमप्रभा पुनः पुनः कलिङ्गसेनायाः समीपं प्रति गतागतानि कुर्वन्ती आसीत्।

अथ कदाचित् कलिङ्गसेना आत्मनः समीपं समागतां सोमप्रभाम् एवं प्रत्यभाषे। 'सखि! मदन्तरङ्गनिर्विशेषायां भवत्यां किञ्चित् रहस्यं निवेदयितुम् इच्छामि। 'विवाहयोग्ये वयसि वर्तमानां मां बहवो राजानः कामयन्ते। तातस्तु मां प्रसेनजित्नाम्ने श्रावस्तीश्वराय दातुम् इच्छति' इति मम अम्बया अभिहितम्। अपि सः त्वया दृष्ट पूर्वः? तथाचेत् ब्रूहि; कथंभूतः सः? किं रूपश्च? इति। तत् श्रुत्वा सोमप्रभा कराभ्यां कर्णौ पिधाय शान्तं पापम्; प्रतिहतम् अमङ्गळम्; इति उक्त्वा नेत्राभ्यां भृशम् अश्रूणि मुमोच। कलिङ्गसेना तां दुःखकारणं पप्रच्छ। सोमप्रभा एवम्। अवादीत्।

सखि! वयः, शीलं, कुलं, विद्या, रूपम्, इत्यादीनि बहूनि वरस्य लक्षणानि अन्विष्यन्ते। तेषु वय एव प्रधानम्। श्रावस्तीश्वरः प्रसेनजित्, यद्यपि शीलकुलविद्यारूपादिभिः संपन्नः, तथापि, वृद्धः। वृद्धस्य कुलादिभिः किं प्रयोजनम्? तत् नायं तव अनुरूपः पतिः। किन्तु, कौशाम्बीम् राजधानीम् अधिवसन् वत्सराजः एव तव अनुरूपः पतिः। सोपि त्वाम् अनिरूपवतीम् श्रुतवान्। तत् त्वयि दृढम्

अनुरागम् आवहति। तथापि; वासवदत्ता नाम अस्य महिषी वर्तते। तस्याम् अस्य निरतिशयः अनुरागः बहुमानश्च। तल्लोपभिया त्वां नाभ्यर्थयते इति।

तत् श्रुत्वा कलिङ्गसेना सोमप्रभाम् आबभाषे। 'प्रियसखि, विचिन्त्यतां सः उपायः, येन वत्सराजो मां परिणेष्यति। अथवा बाणासुरसुतायाः उषायाः कृते अनिरुद्धम् इव चित्रलेखा त्वमेव एनम् इह उपानय, इति। अथ सोमप्रभा अवादीत्। 'असुरयोषा चित्रलेखा परपुरुषस्पर्शादिकं निश्शङ्कम् अकरोत्। अहम् एवंविधं कर्म कथं कुर्याम्। इदन्तु करिष्यामि। आरोहतु भवती मदीयं विमानम्। पूर्वं प्रसेनजितं प्रदर्श्य पश्चात् वत्सराजसमीपं त्वां प्रापयिष्यामि। तत सर्वान् परिच्छदान् आदाय प्रतिष्ठस्व' इति। कलिङ्गसेना तथा इति अभ्युपगम्य, अनामन्त्र्य मातापितरौ, अविगणय्य कुलाचारम्, अनादृत्य लोकप्रवादम्, सर्वं परिच्छदं कोशञ्च आदाय, सोमप्रभया सह विमानम् आरुह्य, प्रतस्थे। मदनातुराः भावि शुभम् अशुभं वा नेक्षन्ते; आर्यम् अनार्यं वा कर्म सहसा कुर्वन्तीति।

अथ सोमप्रभा ताम् आदाय श्रावस्तीम् जगाम। तत्र जरापलित-शरीरम् प्रसेनजितं राजानं दर्शयामास। ततः कौशाम्बीं गत्वा नगरात् बहिः उद्याने विहरन्तम् मन्मथसमानाकारं वत्सराजं दर्शयामास। तमेव सुचिरम् अनिमिषाभ्यां लोचनाभ्यां पश्यन्ती कलिङ्गसेना 'सखि!

सोमप्रभे ! अद्यैव माम् अनेन संगमय। नाहम् अनेन विनाभूता क्षणमपि जीविष्यामि' इति उवाच। सोमप्रभा तु 'सखि ! अद्य बहूनि दुर्निमित्तानि उपलक्ष्यन्ते ! तत् अस्मिन्नेव उद्याने परैः अलक्षिता कंचित् कालम् आस्व। अहन्तु मदीयं गृहं गत्वा शीघ्रमेव प्रत्यागमिष्यामि' इति उक्त्वा प्रयौ। वत्सराजोपि उद्याने सुचिरं विहृत्य सपरिजनः स्वावासं जगाम। अथ कलिङ्गसेना शकुनज्ञया सोमप्रभया निषिद्धापि, मन्मथावेशस्य परां काष्ठाम् अधिरूढा, वत्सेश्वरंप्रति, वृद्धदूतम् एकं प्राहिणोत्। स च दूतः प्रतीहारेण प्रवेशितः वत्सराजं प्रणम्य एवं व्यजिज्ञपत्।

'देव ! तक्षशिलायां नगर्यां कलिङ्गदत्तस्य राज्ञः कलिङ्गसेना नाम दुहिता अस्ति। सा च यौवने वयसि वर्तमाना बहुभिः भूपालैः अर्थितापि त्वाम् एव आत्मनः अनुरूपं पतिं निश्चितवती। सेयम् इदानीम् सर्वान् बन्धून् परित्यज्य, प्रियसख्या मयासुरदुहित्रा नळकूबरभार्यया सोमप्रभया सह, विमानम् आरुह्य, भवदीयम् उद्यानम् आगता। तम् इमम् वृत्तान्तम् निवेदयितुम् तया देवस्य समीपं प्रेषितः अस्मि। तत् प्रतिगृह्णीष्व ताम्। चन्द्रिकाचन्द्रयोरिव युवयोः योगः श्लाघ्यतमः भविष्यति' इति। इत्येवं वृद्धदूतस्य वचनं निशम्य परमानन्दभरितः वत्सराजः तथेति तद्वाक्यम् अभिनन्द्य, वस्त्रभूषणादिभिः पारितोषिकैः तं पर्यतोषयत्। ततः सद्य एव प्रधानामात्यं यौगन्धरायणम् आहूय, सर्वं न्यवेदयत्। स तु राज्ञः हितम् आकांक्षन्, क्षणम् एवम् अचिन्तयत्।

'कलिङ्गसेना तावत् रूपेण विख्याता। भुवनत्रयेपि तत्सदृश-सौन्दर्यवती नास्ति। देवाः अपि तस्यै स्पृहयन्ति। यदि तां वत्सराजः परिणेष्यति, तदा सर्वम् अन्यत् परित्यज्य तस्याम् एव आसक्तः भविष्यति। तथा चेत्, वासवदत्ता चिरं जीवितं न धारयिष्यति। कुमारस्य नरवाहनदत्तस्यापि अभद्रं संभविष्यति। पद्मावत्याः जीवितमपि संशयग्रस्तम् भविष्यति। चण्डमहासेनप्रद्योतौ च दुहित्रोः विपत्त्या प्राणान् त्यक्ष्यतः। अथवा, वत्सराजे द्वेषं वा करिष्यतः। तत् कलिङ्गसेनायाः पाणिग्रहणे सर्वनाशः संभाव्येत। नापि तस्याः पाणिग्रहणं सर्वथा निषेद्धुं युक्तं। तथा चेत् राज्ञः कामजं व्यसनम् अधिकं भविष्यति। तस्मात्, कालहरणम् एव इदानीम् उचितम्, इत्यादि बहुधा विचिन्त्य यौगन्धरायणः वत्सराजम् एवम् उवाच।

'देव भाग्यवानसि, यत् कलिङ्गसेनया स्वयं वृतः असि। कलिङ्गदत्तश्च ते सुहृत् संजातः। तत् शुभे मुहूर्ते कलिङ्गसेनायाः पाणिग्रहणं निर्वर्तयितव्यम्। ज्यौतिषिकान् पृष्ट्वा पाणिग्रहणार्थं प्रशस्तं लग्नं निर्णेष्यामि। अस्याः विभवानुगुणं वासगृहं दीयताम्। अत्युत्तमानि वस्त्राणि आभरणानि च प्रहीयन्ताम्। तत्परिचर्यार्थं दास्यो दासाश्च नियुज्यन्ताम्, इति। वत्सराजश्च यथोक्तं अन्वतिष्ठत्। शीघ्रमेव आत्मनः मनोरथःसेत्स्यति' इति प्रहृष्टो बभूव।

यौगन्धरायणोपि सर्वान् ज्यौतिषिकान् आहूय एवम् उक्तवान्। 'वत्सराजस्य हितार्थे भवद्भिः साहाय्यं कर्तव्यम्। स च,'कलिङ्गसेनायाः पाणिग्रहणे अनुरूपं शुभं लग्नं निर्धारयत, इति भवतः वक्ष्यति। तदा भवद्भिः पाणिग्रहणानुकूलः शुभः मुहूर्तः षण्मासाभ्यन्तरे नास्तीति वक्तव्यम्। अनृतवचनेन दोषः न शङ्कनीयः। "सत्यं भूतहितं प्रोक्तम्" इति हि स्मरन्ति स्मृतिकर्तारः, इति। तैरपि तथेत्यङ्गीकृतम्। अथ परेद्युः यौगन्धरायणः राज्ञः सभाम् आसाद्य राजदूतैः सर्वान् ज्यौतिषिकान् आहाययामास। तेपि आजग्मुः। यौगन्धरायणः राज्ञः समक्षं तान् एवं उवाच। शीघ्रमेव विवाहमङ्गलस्य अनुकूलः मुहूर्तः निरीक्ष्यताम्' इति। ते तु पूर्वमेव कृतं सङ्केतं मनसि निधाय,एवम् ऊचुः। षट्सु मासेषु गतेषु, सप्तमे मासे शुभः लग्नः लप्स्यते; इति।

तत् श्रुत्वा यौगन्धरायणः मृषाकोपं कृत्वा एवम् अब्रवीत्। 'एते धूर्ताः न किमपि जानन्ति। अन्यः महापण्डितः वर्तते। यः देवेन पदेपदे संमानितः। स इदानीम् न आयातः। स आनीय पृच्छ्यताम्' इति। राजापि तथेति दूतैः तम् आनाययामास। सोपि यौगन्धरायणेन पूर्वमेव कृतसंकेतः, तथैव उक्तवान्। अथ यौगन्धरायणः विमनाः इव भूत्वा 'देव! किम् अत्र कर्तव्यम्?' इति पप्रच्छ। राजा तु, कलिङ्गसेना किम् मन्यते? इति ज्ञायताम्; इति उवाच। यौगन्धरायणः तथेति उक्त्वा द्वौ ज्यौतिषिकौ आदाय कलिङ्गसेनायाः समीपम् उपजगाम। गत्वा च ताम् एवम् अब्रवीत्।

'देवि वत्सराजः त्वाम् परिणेतुं त्वरावान् वर्तते। शुभं लग्नं निर्धारयितुं द्वौ गणकौ आनीतवान् अस्मि। ब्रूहि तव जन्मनक्षत्रम्' इति। तत्परिजनेन जन्मनक्षत्रे उक्ते, तौ गणकौ मृषागणनं विधाय, यथापूर्वम् एव ऊचतुः। तत् श्रुत्वा कलिङ्गसेना चिन्तार्णवमग्ना बभूव। तदानीं तस्याः वृद्धदूतः एवम् उवाच। 'शुभलग्ननिरीक्षणं तावत् आवश्यकमेव। काल एव हि सर्वेषां शुभानाम् अशुभानाञ्च कारणम्। शुभः मुहूर्त एव दंपत्योः आयत्यां श्रेयः प्रदः। सः समीपे वा भवतु, दूरे वा भवतु। सर्वथा प्रतीक्षणीय एव' इति। यौगन्धरायणोपि 'देवि! निषिद्धदिनेषु शुभानि कर्माणि न कर्तव्यानि। तथा कृतानि चेत् पश्चात् महत् दुःखम् उपजनयेयुः। तस्मात् शुभलग्ननिरीक्षणम् एव वरम्।, इत्युवाच। तत् श्रुत्वा, कलिङ्गसेना 'कालो दुरतिक्रम' इति निश्चित्य, 'यथा भदन्तः सर्वे जानन्ति, तथैव क्रियताम्, इत्युवाच। यौगन्धरायणः वत्सराजस्य समीपं गत्वा तस्मै कलिङ्गसेनायाः अपि कालप्रतीक्षणमेव अभिमतम्, इति उक्त्वा, स्वगृहं जगाम।

एवम् आत्मनः प्रज्ञाविभवेन कलिङ्गसेनायाः पाणिग्रहणे विघ्नम् उत्पाद्य, कार्यशेषस्य निर्वर्तनाय आत्मनः सुहृदं योगेश्वराख्यं ब्रह्मराक्षसं सस्मार। स्मरणमात्रसंनिहितः सः योगेश्वरः यौगन्धरायणस्य पुरतः स्थित्वा, किं कार्यं मया? इति पप्रच्छ। यौगन्धरायणः तस्मै वत्सराजस्य अभद्रावहं कलिङ्गसेनावृत्तान्तं सर्वं निवेद्य, पुनरपि एवं जगाद। 'सखे! कलिङ्गसेनायाः पाणिग्रहणे मया कालातिपातः संपादितः। इतः परम् त्वं प्रच्छन्नः भूत्वा, कलिङ्गसेनायाः समीपे वसेः। तस्याः

चारित्रञ्च त्वया निपुणं परीक्षणीयम् । सा हि भुवनत्रयदुर्लभेन सौन्दर्येण विराजते । नूनम् अस्यै सिद्धाः विद्याधराश्च स्पृहयेयुः।काम रूपधराः ते अन्यवेषं धृत्वापि तया सह सङ्गं कुर्युः । तदपि जागरूकेण त्वया ज्ञातव्यम् । अन्यवेषधारिणः निद्रासमये स्वीयमेव रूपं भजन्ते । सावधानः त्वं सर्वम् अदसीयं चारित्रं जानीहि। तच्च यथादृष्टम् अस्मासु निवेदनीयम्। तेन वत्सराजस्य तस्यां वैराग्यम् संपादनीयम्' इति।

तत् श्रुत्वा ब्रह्मराक्षसः प्राह। 'किम् अनेन प्रयासेन? भ्रष्ट-चारित्रां तां सद्य एव हनिष्यामि' इति । यौगन्धरायणः प्रत्युवाच । 'तथा न कर्तव्यम् । महान् अधर्मः भविष्यति' इति । योगेश्वरः तथेति तद्वाक्यम् अङ्गीकृत्य, तिरस्करिण्या विद्यया प्रच्छन्नः कलिङ्गसेनायाः गृहं प्रविवेश । प्रविश्य च, तामेव निर्निमेषेण चक्षुषा वीक्षमाणः आसीत् । अत्रान्तरे वासवदत्ता राज्ञः कलिङ्गसेनानुरागम् उपलक्ष्य नितराम् उन्मनीबभूव। यौगन्धरायणः ताम् आसाद्य एवम् आश्वासया-मास । 'राज्ञि ! विषयम् इमम् अधिकृत्य किञ्चिदपि मा उन्मनीभूः । यावत् अहं जीवामि तावत्कालम् पद्मावतीम् ऋते न अन्या तव सपत्नी भविष्यति । सत्यमिदम्। तथापि किञ्चित् कार्यं भवत्या कर्तव्यं कथयिष्यामि । तत् अङ्गीकुरुष्व । राजा आत्मनः कलिङ्गसेनायाम् अनुरागम् भवत्यै निवेदयिष्यति । तदानीम् तन्मनोरथस्य अनुकूलेव भूत्वा एवं कथय । "आर्यपुत्र ! उचितमिदम् । कलिङ्गदत्तराज्यमपि तव हस्ते पतिष्यति । तत् अवश्यं कलिङ्गसेना स्वीकर्तव्येति" । एवमुक्ते, सः भवत्यां पूर्वाधिकं बहुमानं करिष्यति । आत्मनः मनोरथस्य प्रत्यूह

नास्ति इति कलिङ्गसेनाविवाहे शिथिलप्रयत्नः भविष्यति। अन्यथा प्रतिषिद्धे मनोरथे अधिकम् उत्कण्ठितः भविष्यति। पद्मावतीमपि इमम् अर्थम् अवबोधय' इति। वासवदत्तापि तथेति अङ्गीचकार।

अथ कदाचित् सोमप्रभा कलिङ्गसेनायाः समीपम् उपजगाम। तदानीम् स्ववचनम् अतिलङ्घ्य वत्सराजं प्रति दूतप्रेषणम्, षड्भ्यः मासेभ्यः परमेव ज्यौतिषिकैः विवाहमुहूर्तनिर्धारणञ्च परिज्ञाय नितरां निर्विण्णा एवम् आचभाषे। सखि! सपत्न्यः त्वयि अलीकम् अपराधम् आरोपयेयुः। विवाहमुहूर्तः बहुतिथात् कालात् परं निर्दिष्टः। देवा अपि त्वां परिणिनीषन्ति। तत् सर्वथा आत्मा रक्षणीयः। अस्मिन् विषये जागरूकया भवत्या भवितव्यम्। मयापि इतः परम् पत्युः सदनम् अधिवसन्तीम् भवतीम् पदे पदे द्रष्टुम् अशक्यम्। इदानीं तु कथंचित् मम भर्तुः अनुज्ञाम् अधिगम्य इह आगतवती अस्मि। न हि किञ्चिदपि मया कर्तव्यम् इह विद्यते। तत् भर्तुः सकाशं गमिष्यामि। कार्येषु स्मृता संनिधिं दास्यामि। सर्वथा रक्ष आत्मानम्' इति उक्त्वा प्रययौ। अथ वत्सराजः कलिङ्गसेनायां दृढानुरक्तस्य मनसः कुत्रापि विनोदम् अलभमानः वासवदत्तायाः सदनम् उपससाद। पूर्वमेव यौगन्धरायणेन उपमन्त्रितं मनसि धारयन्ती सा वासवदत्ता राजानं पूर्वाधिकेन आदरेण उपचचार। तत् दृष्ट्वा राजा कलिङ्गसेनावृत्तान्तः अनया न ज्ञात इव भाति, इति मत्वा, तद्गतं वृत्तान्तं सर्वम् आचख्यौ।

तत् आकर्ण्य वासवदत्ता पूर्वाधिकेन मुखविकासेन विराजमाना एवमुवाच। अहो आर्यपुत्रस्य अतर्कितोपनता श्रेयःपरंपरा। अनेन

कलिङ्ग-सेनापरिग्रहेण कलिङ्गदत्तोपि तव सुहृत् संजातः । तत् कलिङ्गसेनायाः प्रणयः सर्वथा अनिराकरणीयः इति । तदाकर्ण्य वत्सराजः नितराम् विस्मितः बभूव । मनसि च एवं चिन्तयामास । अहो महानुभावेयं वासवदत्ता । या पद्मावतीमिव कलिङ्गसेनामपि सपत्नीम् अनुमन्यते । अस्याः यत् अनिष्टम् तत् सर्वथा न कर्तव्यम् । अस्याः महामनस्विताम् अनुचिन्त्य कालिङ्ग-सेनायाः पाणिग्रहणेपि मनो मे न प्रसरति । एवम् अनुचिन्त्य वासवदत्ताम् आमन्त्र्य स्वभवनं जगाम । अथ परेद्युः पद्मावत्याः सदनम् अगात् । सापि वासवदत्तया पूर्वमेव अव बोधितकर्तव्या तथैव राजानम् सविशेषम् उपचचार । एवम् तयोः देव्योः एकरूपां मनो वृत्तिम् उपलक्ष्य संजातसंदेहः वत्सराजः यौगन्धरायणम् आहूय तस्मै सर्वं शशंस । सः महामतिः अवसरः इदानीं राजानम् कलिङ्गसेनापरिणयदुराग्रहात् निवर्तयितुम् इति विचिन्त्य एवम् उवाच ।

देव ! जानेऽहं देव्योः अभिप्रायम् । कलिङ्गसेनापाणिग्रहणे नियतं तृणवत् जीवितम् उत्स्रक्ष्यतः । सरलहृदयाः महानुभावाश्च साध्व्यः चिरं सपत्नीदुःखं नानुभवन्ति । तत् यदि कलिङ्गसेना परिणीयते देवी वासवदत्ता नियतं प्राणान् त्यक्ष्यति । पद्मावती च तामेव गतिम् गमिष्यति । ततः कुमारः नरवाहनदत्तश्च कथं जीविष्यति । ततः श्वशुर-स्यालादि सर्वं बन्धुजातं प्रकुपितं भविष्यति । तत् कलिङ्ग-सेना-पाणिग्रहणे महान् अनर्थः संभविष्यति' इति यौगन्धरायणस्य वचनं निशम्य वत्सराजः मनसि संजातविवेकः एवं बभाषे । मन्त्रिन् ! भवता उक्तं सर्वं सत्यम् । मम कलिङ्गसेनायाः पाणिग्रह-

णेन किं प्रयोजनं भविष्यति ? दिष्ट्या अत्र ज्यौतिषिकैः कालातिपातः कारितः । तत् स्वयंवरार्थम् आगतामपि कलिङ्गसेनाम् न परिणेष्यामि, इति। अथ यौगन्धरायणः स्वस्य नीतिप्रयोगं फलितं दृष्ट्वा मनसि अमान्तम् आनन्दम् उद्वहन् राजानम् आमन्त्र्य स्वगृहं प्रययौ । अथ राजा वासवदत्तायाः सदनम् उपजगाम । सा च राज्ञे सर्वोऽयं यौगन्धरायणस्य नीतिप्रयोगः इति आचख्यौ । तत् आकर्ण्य राजा तस्य बुद्धिकौशलं बहुधा प्रशशंस ।

एवंस्थिते कलिङ्गसेनायाः रूपलावण्यादिकम् अभिवीक्ष्य तस्यां बहवः विद्याधराः अनुरक्ताः बभूवुः । तेषु एकः मदनवेगो नाम विद्याधरः आसीत् । सः कलिङ्गसेनालाभाय तपसा भगवन्तं भवानीपतिम् आराधयामास । तेन तथैव वरः दत्तः । तथापि तां वत्सराजासक्तमानसां तस्यैव बाह्योद्यानम् अधिवसन्तीम् दृष्ट्वा भृशं विषण्णः बभूव । सर्वदा अस्या एव लाभोपायं चिन्तयन् आस्त ।

एकदा रजन्याम् मदनवेगः कलिङ्ग-सेनामन्दिरोपरि संचचार । तदानीम् भगवता भवानीपतिना दत्तया विद्यया वत्सेश्वरस्येव रूपं दध्रे । तेन रूपेण कलिङ्ग-सेनायाः मन्दिरं विवेश । तं दृष्ट्वा द्वारपालाः वत्सराजोयमिति मत्वा प्रणम्य बद्धाञ्जलयः तस्थुः । कलिङ्गसेनापि एनं दृष्ट्वा ससाध्वसं सलज्जञ्च समुत्तस्थौ । अथ मदनवेगः बहुभिः चाटुवचनैः तां विश्वास्य गान्धर्वेण विधिना उपयेमे । योगेश्वरोपि वत्सराज एवायम् इति मन्यते स्म । अथ यौगन्धरायणं गत्वा बोधयामास ।

सोपि तं योगेश्वरम् एवम् आज्ञापयामास। 'वासवदत्तायाः सदने वत्सराजः वर्तते वा नवेति प्रच्छन्नः भूत्वा निरीक्षस्व' इति। योगेश्वरः तथैव वासवदत्तायाः सदनम् उपजगाम। तत्र पर्यङ्के शयानम् वत्सराजं ददर्श। दृष्ट्वा च यौगन्धरायणाय शशंस। यौगन्धरायणोपि योगेश्वरम् 'गच्छ शीघ्रं कलिङ्गसेनायाः सदनम्। निद्रासमये जानीहि कोयं कलिङ्गसेनाकामुकः' इति आज्ञापयामास। योगेश्वरः तथैव कलिङ्ग-सेनायाः सदनम् उपजगाम.।

तत्र अर्द्धरात्रे गाढसुप्तया तया सह शयानम् आत्मनः स्वरूपे स्थितम् मदनवेगं ददर्श। ततः सद्यः एव यौगन्धरायणम् उपगम्य एवं निवेदयामास। 'मन्त्रिवर्य,अहो तव प्रतिभायाः प्रभावः,यत् अस्मादृशैः अदृश्यमपि वस्तु त्वं पश्यसि। सर्वथा भाग्यवान् वत्सराजः; यस्य त्वम् अमात्योसि। यथा भवता शङ्कितं; तत् तथैव। मदनवेगाख्यः विद्याधरः वत्सराजवेषं विधाय कलिङ्गसेनया सह रमते, इति। एवम् उक्तवते योगे-श्वराय यौगन्धरायणः यथोद्दिष्टं प्रदेशं गन्तुम् अनुज्ञां ददौ। सोपि यौगन्धरायणं प्रणम्य प्रययौ।

अथ प्रभाते यौगन्धरायणः वत्सेश्वरं द्रष्टुं ययौ। तत्र कथाप्रसङ्गे एवम् अब्रवीत्। 'देव कलिङ्गसेना न भवतः पाणिस्प-र्शमर्हति। यदियम् अन्यपुरुषेण संपर्कम् आचरति' इति। तत् श्रुत्वा राजा एवम् उवाच। 'कथं कुलकन्यका एवम् अकृत्यं करिष्यति' इति। यौगन्धरायणः प्रत्युवाच। 'अस्यामेव निशि प्रत्यक्षम्

एतत् ते दर्शयिष्यामि' इति। कुतूहलाकृष्टमानसः वत्सराजोपि तस्यामेव रात्रौ यौगन्धरायणेन सह कलिङ्गसेनायाः मन्दिरम् अवाप। अन्तः प्रविश्य च कलिङ्गसेनया सह सुखसुप्तं मदनवेगं ददर्श। अथ यावत् महता रोषेण तं हन्तुम् इयेष; तावत् मदनवेगः झटिति प्रबुद्धः गगनम् उत्पपात।

अथ कलिङ्गसेनापि प्रबुबुधे। प्रबुध्य च शून्यं शयनं दृष्ट्वा एवम् आचक्रन्द। अहो कष्टम् पूर्वप्रबुद्धः वत्सराजः माम् एकाकिनीम् उत्सृज्य कुत्रापि गतवान्, इति। तदानीम् यौगन्धरायणः राज्ञा सह तस्याः समीपम् उपनगाम। उवाच च 'कलिङ्गसेने केनापि विद्याधरेण अस्मत्स्वामिनः वेषं विधाय वञ्चनया परिणीतासि। तस्मात् न त्वं वत्सराजस्य भार्या भवितुम् अर्हसि, इति।

श्रुत्वैतत् कलिङ्गसेना दुर्घणाभिहतेव भूताविष्टेव नितरां शोक विह्वला बाष्पव्याकुललोचना बभूव। अथ राजमन्त्रिणौ स्व स्व मन्दिरम् उपजग्मतुः। अथ कलिङ्गसेना यूथपरिभ्रष्टा मृगीव अतिमात्र विह्वलहृदया सदनात् बहिः आगत्य गगनम् अभिवीक्ष्य इदम् अब्रवीत् 'यो मां वत्सराजवेषं विधाय परिणीतवान्; सः मयि कृपया स्वस्वरूपं प्रकाशयतु; तमेव अहं भर्तारं वृणे' इति। अथ मदनवेगः हारकेयूरादिभिः दिव्यैः भूषणैः भूषितः गगनात् अवतीर्य तस्याः समीपम् उपजगाम अथैवम् उवाच 'प्रिये कलिङ्गसेने मदनवेगाख्यं विद्याधरं मां विद्धि। अहं किल त्वां वत्सराजवेषेण परिणीतवान् अस्मि। पुराहं पितुः गृहे

वर्तमानां भवतीं वीक्ष्य जातानुरागः त्वत्प्राप्तये महेश्वरम् आराधितवान्। वरश्च त्वत्प्राप्तिरूपः महेश्वरेण मह्यं दत्तः।

अथ वत्सेश्वरे दृढानुरक्तां त्वाम् अभिवीक्ष्य। 'अयमेव निर्दोषः उपायः' इति मत्वा वेषविपर्यासेन त्वां परिणीतवानस्मि। इतः परमपि त्वया अत्रैव वस्तव्यम्। मानुष्या त्वया नास्माकं वसतिः अधिगन्तुम् शक्या' इत्युक्त्वा भूरिस्वर्णानि तस्यै दत्वा गगनम् उत्पपात। विदितवृत्तान्तः वत्सराजोपि तां तत्रैव वस्तुम् अनुमेने। विद्याधरं भर्तारम् अवाप्य सन्तुष्टान्तरङ्गा कलिङ्गसेना भर्तुरनुमत्या तत्रैव बाह्योद्याने सुखम् उवास।

इति त्रयोदशः उच्छ्वासः

मदनमञ्चुकापरिणयो नाम चतुर्दशः उच्छ्वासः

अथ बहुतिथे काले व्यतीते, कलिङ्गसेना गर्भं दधौ। ततश्च मदनवेगः ताम् उपेत्य एवम् अब्रवीत्। 'कलिङ्गसेने! गर्भोत्पत्त्यनन्तरम् देवाः न मानुषीषु सङ्गम् इच्छन्ति। एषः देवानां समयः "श्रूयते हि पुरा मेनका शाकुन्तलाम् प्रसूय मुनिम् विश्वामित्रम् उत्सृज्य गतवती"। इति। तत् अहं गमिष्यामि। समये स्मृतः संनिधिं दास्यामि' इति उक्त्वा मदनवेगः ययौ। यदा हि भगवता महेश्वरेण मन्मथः अनङ्गः कृतः;

तदा रतिः देवी साङ्गस्य भर्तुः प्राप्तये तपः चचार। तेन तुष्टः शम्भुः रतिम् एवम् आदिदेश। 'स्वयंकृतादेव अविनयात् मया दग्धशरीरः ते पतिः कौशाम्ब्याम् उदयनस्य राज्ञः पुत्रः नरवाहनदत्ताख्यो जात। त्वमपि मर्त्यलोके अयोनिजा कुमारी भूत्वा तेन सह संयोक्ष्यसे' इति।

अथच विधातारम् एवम् आदिदेश। 'मर्त्यलोके कौशाम्ब्याम् वत्सराजस्य बाह्योद्यानम् अधिवसन्ती कलिङ्गसेना दिव्यं पुत्रं प्रसोष्यते। तं मायया अपहृत्य रतिमिमाम् अयोनिजां कन्यां निर्माय तत्स्थाने निक्षिप' इति। यदा कलिङ्गसेना दिव्यं पुत्रं प्रासूत, तदा विधिः शम्भोः निदेशम् अन्वतिष्ठत। तदानीम् सर्वे जनाः तत्तिमिरापहकान्तिं पुत्रिकां प्रसूतां ददृशुः। विस्मयनीयलावण्यां तां विलोक्य कलिङ्गसेना पुत्रजन्मातिरिक्तं महोत्सवं व्यधत्त।

अथ वत्सराजः कलिङ्गसेनायाः पुत्रिकाजननवृत्तान्तं श्रुत्वा यौगन्धरायणेन सह वासवदत्ताम् अभिगम्य एवम् उवाच। 'कलिङ्गसेना देवैरपि स्पृहणीयाकृतिं दुहितरं प्रसूतवती। सेयम् आयुष्मतः नरवाहनदत्तस्य महिषी भवितुम् अर्हति' इति। तत् श्रुत्वा वासवदत्ता राजानम् एवम् उवाच। 'देव! किमेवं वदसि? क्वायं कुलद्वयविशुद्धः ते कुमारः नरवाहनदत्तः? क्वेयं बन्धकीगर्भसंभवा कलिङ्गसेनातनया? कलिङ्गसेना हि पूर्वं प्रसेनजिति, ततः त्वयि ततः मदनवेगे च कृतानुरागा बन्धक्येव। तत् कथम् अस्माकं संबन्धयोग्या भविष्यति? इति।

तत् श्रुत्वा वत्सराजः प्रत्युवाच। 'इयं कलिङ्गसेना केनापि शापदोषेण भुवम् अवतीर्णा दिव्ययोषित् इति वदन्ति; तस्याम् उत्पन्ना

कन्यकापि दिव्यांशसंभवैव, इति मन्ये । अपिच "स्त्रीरत्नं दुष्कुलादपि" इति हि स्मृतिः अनुशास्ति । न केवलम् अयम् ममैव एकस्याभिप्रायः ; किन्तु आकाशवाण्यापि एवमेव उक्तम्; इति। अथ यौगन्धरायणः बभाषे। 'देवि! सत्यमिदम् यत् देवेन उक्तम ; योगेश्वरो नाम ब्रह्मराक्षसः मम सुहृत् मम् आगत्य कलिङ्गसेनातनयाम् अधिकृत्य एवम् उक्तवान् ; "कलिङ्गसेनाहि पूर्वस्मिन् जन्मनि दिव्ययोषित् शापदोषेण भुवम् अवतीर्य बन्धकीप्रवादं भेजे; अस्याः खलु देव्याः अयोनिजा कन्या रतेः अंशभूता विधिना दत्ता; इयमेव वत्सराजकुमारस्य नरवाहनदत्तस्य भार्या भविष्यति" इति' । तत् श्रुत्वा वासवदत्ता तथेति अङ्गीचक्रार ।

अथ कलिङ्गसेना आत्मजायाः "मदनमञ्चुका इति नाम चक्रार। सा च कन्यका दिनेदिने शुक्लपक्षशशिकलेव सकलजननयनानन्दकारिणी ववृधे । कलिङ्गसेनापि वत्सराजेन अभीप्सितं संबन्धम् आकर्ण्य नितरां ननन्द । अथ च क्रमेण यौवनं वयः समारूढः नरवाहनदत्तः पित्रा यौवराज्ये प्रतिष्ठापितः बभूव । तस्य च यौगन्धरायणात्मजः मरुभूतिः मन्त्री बभूव। रुमण्वतः तनयः हरिशिखः सेनापतिः आसीत् । वसन्तकस्य सुतः तपन्तकः नर्मसचिवः समभूत् । इत्यकस्य आत्मजः गोमुखः प्रतीहारः बभूव । पिङ्गलिकाख्यायाः ब्राह्मण्याः पुत्रौ वैश्वानरशान्तिसोमौ पुरोहितौ अभूताम् । नरवाहनदत्ते यौवराज्यपदम् अध्यासीने दुर्भिक्षत्र्याधितस्कराः धरणीतलं परित्यज्य पलायाञ्चक्रिरे ।

अथ कदाचित् कलिङ्गसेना प्रियसखीं सोमप्रभां सस्मार । सा च सद्य एव भर्तुः अनुज्ञाम् अधिगम्य रात्रौ कलिङ्गसेनायाः समीपम्

उपजगाम। आगत्यच स्वभर्तुः मुखात् श्रुतं वत्सराजेन सह संबन्धं भाविनम् निवेदयामास! अथ च मदनमञ्चुकायाः कृते दिव्यम् एकम् उद्यानम् निर्ममे। तत्र च सुवर्णमय्यः वेदिकाः रत्नखचितानि कुट्टिमानि। सौवर्णाः प्राकाराः। विद्रुममयाः स्तम्भाः। मुक्तामय्यः सिकताः। इत्यादि, सर्वम् अमानुषम् अतिविस्मयावहम् आसीत्। एतादृशम् उद्यानं मदनमञ्चुकायै दत्त्वा सोमप्रभा कलिङ्गसेनाम् आमन्त्र्य स्वावासं ययौ।

परेद्युः प्रभाते कौशाम्बीनगरवासिनः सर्वे जनाः तत् दिव्यमुद्यानं निरीक्ष्य नितरां विस्मिताः बभूवुः। अथ वत्सराजयौगन्धरायणादयः 'कुतः इदम उद्यानम् आसादितम्' इति कलिङ्गसेनां पप्रच्छुः। सा च आत्मनः सोमप्रभया सह मैत्रीम् तया उद्याननिर्माणम् इत्यादि सर्वं निवेदितवती। अथ कदाचित् वत्सराजः देवालयं जगाम। तत्र दिव्याः कन्याः ददर्श। ताः 'काः यूयम्' इति पप्रच्छ। ताश्चैवम् अब्रुवन्। 'राजन्! वयं चतुष्षष्टिः कलाः। भगवतः भवानीपतेः आज्ञया भवतः कुमारं नरवाहनदत्तम् उपासितुम् आगताः' इति।

तत् श्रुत्वा परमानन्दभरितः वत्सराजः मदनमञ्चुकामपि सर्वासु कलासु शिक्षापयामास। अथ सर्वासु कलासु नितां नैपुण्यं प्रदर्शयन्तीम् मदनमञ्चुकाम् अभिवीक्ष्य नरवाहनदत्तः तस्याम् अत्यन्तम् अनुरक्तहृदयः बभूव। सा च तस्मिन् अनुरक्ता आसीत्। एवं प्रतिक्षणम् अभिवर्धमानानुरागौ तौ क्षणमपि परस्पर-

दर्शनं विना स्थातुं न शेकतुः एतयोः अत्युत्कटम् अनुरागम् अभिवीक्ष्य वत्सराजः 'विना विलम्बम् एनयो पाणिग्रहणमहोत्सवः निर्वर्तयितव्यः' इति निश्चितवान्। 'परन्तु पुंश्चलीति प्रथां उपगतायाः कलिङ्गसेनायाः संबन्धे लोकः किं वक्ष्यति' इति शङ्कया निरुद्योगः तस्थौ।

तदानीम् आकाशे अशरीरिणी वाक् एवम् उच्चचार 'नरवाहनदत्तोयम् कामस्य अंशेन अवतीर्णः। कामस्य भार्या रतिरेव मदनमञ्चुकारूपेण अवतीर्णा। तत् एनयोः दांपत्यम् अनुरूपमेव। नरवाहनदत्तश्च सर्वान् शत्रून् विजित्य सर्वविद्याधराणाम् अधिपतिः भविष्यति' इति। इमाम् आकाशवाणीम् श्रुत्वा, वत्सराजः निश्शङ्कं विवाहविधानानि अकारयत्।

अथ च गौहूर्तिकैः शुभतरं मुहूर्तं निर्धारयामास। पुरोहितौ वैश्वानरशान्तिसोमौ नरवाहनदत्तस्य कौतुकमङ्गळानि अकुरुताम्। अथ प्राप्ते विवाहमुहूर्ते नरवाहनदत्तः दिव्यैः भूषणैः अलंकृतां मदनमञ्चुकाम् उपयेमे। तस्मिन् पाणिग्रहणमहोत्सवे, न केवलं जगतीमण्डले, देवलोकेपि, महान् प्रमोदकोलाहलःसमभूत्। कृत्स्नं त्रिभुवनम् उत्सवमयमिव अभूत्। एवं शीलवयोवृत्तादिभिः आत्मन अनुरूपां मदनमञ्चुकां परिणीय, नरवाहनदत्तः परमम् आनन्दम् अवाप। तम् दृष्ट्वा, वसुदत्तावत्सराजावपि परां निर्वृतिम् अभजताम्।

अथ नरवाहनदत्तः रत्नप्रभा, कर्पूरवती, अलंकारवती, इत्याद्याः दिव्यकन्यकाः परिणीय, ताभिः सह रममाणः सुखम् उवास।

अथ एकदा अर्द्धरात्रे मदनमञ्चुका झटिति अदर्शनम् उपजगाम, ताम् अन्वेष्टुं प्रवृत्ताः शुद्धान्तपरिजनाः महान्तं कोलाहलम्

अकुर्वन् । नरवाहनदत्तोऽपि झटिति प्रणष्टां मदनमञ्चुकां विज्ञाय अवाङ्मनसगोचरं संतापम् अनुबभूव । कलिङ्गसेनापि दुहितुः अदर्शनम् आकर्ण्य, भूतोपहतेव प्रणष्टचेतना आसीत् । वृत्तान्तम् एतं विज्ञाय कृत्स्नं कौशाम्बीनगरं पर्याकुलम् अभूत् । तदानीम् काचन अन्तःपुरवृद्धा एवम् आचभाषे ।

"अहोः कालात् पूर्वं मानसवेगः नाम विद्याधरः इह आजगाम । तदानीम् मदनमञ्चुका अनूढा आसीत् । तस्याम् अनुरक्तहृदयः मानसवेगः कलिङ्गसेनाम् आगत्य तां वरयामास । कलिङ्गसेनातु 'पूर्वमेव इयं कन्यका नरवाहनदत्ताय निर्दिष्टा' इति तत् प्रार्थनां निराकरोत् । अथ विमनी भूतः मानसवेगः यथागतं जगाम । तेनैव इदानीम् मदनमञ्चुकाम् अपहृतवता भवितव्यम्' इति ।

तत् श्रुत्वा नरवाहनदत्तः उन्मत्तइव परिजनैः अलक्षितः एकाकी प्रत्याय मदनमञ्चुकाम् अन्विष्यन् वनात् वनं परिबभ्राम । तत्र वेगवती नाम मानसवेगस्य स्वसा मदनमञ्चुकायाः वेषं धृत्वा नरवाहनदत्तम् उपससार । तां दृष्ट्वा नरवाहनदत्तः सरभसं धावित्वा 'प्रिये! किमिदं कृतं भवत्या अकारणे मां विसृष्टवत्या' इति उक्त्वा निर्भरम् आलिलिङ्ग अथ सा एवम् उवाच ।

"अहं पुरा मम पाणिग्रहण महोत्सवे 'यक्षेभ्यः बलिं दास्यामि' इति प्रतिश्रुतवती । तत् तथा न कृतं मया । तेन कुपिताः यक्षाः माम् अजह्रुः तत् इदानीम् यक्षेभ्यः बलिं दातुम पुनर्विवाहः कर्तव्यः" इति । नरवाहनदत्तोऽपि सर्वं तदुक्तं तथैव निर्वर्तयामास । अथ अर्धरात्रे निद्रासमये

स्वप्नरूपेण शयानां वेगवतीं विलोक्य, शङ्काकुलः नरवाहनदत्तः प्रबुद्धाम् ताम् 'कात्वम् ? ब्रूहि सत्यम्; इति पप्रच्छ । सा च एवम् आचभाषे ।

"अस्ति आषाढपुरं नाम विद्याधरपत्तनम् । तत्र च मानसवेगः नाम विद्याधरः । तस्याहं यवीयसी स्वसा वेगवती नाम । मम भ्राता मानसवेगः तव प्रियायाम् मदनमञ्चुकायां अनुरक्तः मायया ताम् अपजहार । अपहृत्यापि रावणइव लब्धशापतया तां बलात्कर्तुं नाशकत् । मदनमञ्चुकापि तेन बहुधा अनुनीता तं तृणवत् निराकृत्य त्वय्येव आबद्धहृदया दुःखम् आस्ते । एवं सति मिथः कथाप्रसङ्गेन मदनमञ्चुकया सह मम सख्यं संजातम् । तस्याः मुखात् भवतः रूपगुणान् आकर्ण्य अनुरक्ता त्वाम् अहम् अभिसृतवती । मदनमञ्चुकायाः वियोगेन शून्यहृदयं त्वाम् आलक्ष्य, पाणिग्रहणाय अयम् उपायः अनुष्ठितः" इति ।

इत्युक्त्वा सा वेगवती विद्याप्रभावेण नरवाहनदत्तम् आदाय आकाशमार्गेण आषाढपुरं निनाय । झटिति नरवाहनदत्तस्य अदर्शनेन कौशाम्बीनगरवासिनः वत्सराजप्रभृतयः परां कोटिम् अधिरूढां दुरवस्थाम् अवापुः । तदानीम् महामुनिः नारदः गगनात् अवतीर्य 'नरवाहनदत्तः कुशली वर्तते; शीघ्रमेव कुशलिन्या मदनमञ्चुकया सह आगमिष्यति, नशोकः कार्यः' इति समाश्वासयामास । तेन ते धैर्यम् अवलम्ब्य तस्थुः ।

आषाढपुरे वेगवत्या समानीतं नरवाहनदत्तम् दृष्ट्वा अमर्षी मानसवेगः तं हन्तुम् उद्युक्तवान् । तस्य पितरौ नरवाहनदत्तं वेगवत्याः

भर्तारं विज्ञाय हननोद्योगात् तं निवारयामासतुः। अथ वेगवती मदनमञ्चुकासहितं नरवाहनदत्तं ऋश्यमूकं नाम पर्वतं प्रापयामास। तत्र धनवती नाम विद्याधरयोषित् आत्मनः कन्यकाम् अजिनावतीं नाम नरवाहनदत्ताय समर्पयामास। तामपि परिणीय नरवाहनदत्तः धनवत्या नीयमानः कौशाम्बीं प्रत्याजगाम। विस्मयोत्फुल्ललोचनाः वत्सराजादयः तं दृष्ट्वा परां निर्वृतिम् अवापुः इति।

इति चतुर्दशः उच्छ्वासः

महाभिषेको नाम पञ्चदशः उच्छ्वासः

अथ सर्वः विद्याधरबन्धुवर्गः नरवाहनदत्तम् उपसृत्य एवम् उवाच। 'मानसवेगादयः बहवः विद्याधराः तव विपक्षाः सन्ति। तान् जित्वैव भवता विद्याधरचक्रवर्तिना भवितव्यम्; तदर्थं काश्चन विद्याः साधनीयाः; विद्यासिद्धयेच्च भवान् इतः प्रस्थाय कैलासे तपः चरेत्' इति।

तथेति अभ्युपगम्य, नरवाहनदत्तः भगवतः भवानीपतेः आवासभूतं सकलसंपदां सिद्धिक्षेत्रं कैलासम् उपगम्य, दुश्चरं तपः चचार। तत्तपसा आराधितः भवानीपतिः साक्षात् आविर्भूय, 'सर्वाः विद्याः स्मरणमात्रेण ते प्रतिभास्यन्ति' इति अनुजग्राह। सहस्रपत्राकीर्णं विमानम् एकमपि ददौ। तल्लाभानन्तरं नरवाहनदत्तः विद्याधरबन्धुवर्गैः कृतसाहाय्यः ससैन्यः प्रस्थाय हिमालयस्य दक्षिणपार्श्वे कृतवसतीन् मानसवेगप्रभृतीन् विद्याधराधिपतीन् अभिगम्य, जिगाय।

हिमालयस्य उत्तरपार्श्वे वसन् मन्दरदेवः नाम, विद्याधर चक्रवर्ती 'दक्षिणपार्श्वस्थान् विद्याधरान् निर्जितान्' आकर्ण्य कुपितः सन् नरवाहनदत्तेन समं युद्धाय संनद्धो बभूव। नरवाहनदत्तः चारमुखात् तज्ज्ञाय भगवतः भवानीपतेः अनुग्रहमेव प्रधानं बलम् अवलम्बमानः मन्दरदेवम् अभ्यषेणयत्। तदानीम् उत्तरपार्श्वे मन्दरदेवनरवाहनदत्तयोः महत् युद्धं प्रावर्तत। तस्मिन् युद्धे आकाशम् अशेषम् गदाखड्गपरिघप्रासशूलादिभिः आयुधैः आकीर्णम् अभूत्। कृत्स्नं भूमण्डलं शस्त्रनिकृत्तैः शिरोभिः आस्तीर्णं बभूव। रुधिरप्रवाहः प्रावृषेण्यः गिरिनदीप्रवाहः इव सर्वतोमुखं सस्यन्दे। छिन्धि भिन्धि जहि इत्यादिकाः क्रूराः वाचः शुश्रुविरे।

एवम् अतिभयंकरे युद्धे नरवाहनदत्तः मन्दरदेवं भूमौ निपात्य पादाभ्यां तस्य उरःस्थलम् आक्रम्य तीव्रवेगोद्यतेन खड्गेन तस्य शिरः छेत्तुं प्रायतत। तदानीम् मन्दरदेवस्य यवीयसी स्वसा मन्दरदेवी नाम सरभसम् आगत्य पादयोः पतित्वा नरवाहनदत्तम् एवम् अभ्यर्थितवती। 'देव! आपन्नवत्सलं भवन्तं शरणम् उपगतास्मि। भ्रातुः मे अभयं देहि' इति। तेन दयार्द्रहृदयः नरवाहनदत्तः तद्वधात् निववृते। अथ मन्दरदेवः नरवाहनदत्तं प्रणम्य, क्षम्यतां ममायम् अपराधः, कृत्स्नं विद्याधरराज्यं त्वमेव परिपालय; इति उक्त्वा, तपश्चरणाय वनं प्रविवेश।

एवं सर्वान् सपत्नान् निर्जित्य निस्सपत्नया राजलक्ष्म्या विभ्राजमानं नरवाहनदत्तम् अभिवीक्ष्य मरुभूतिप्रमुखाः मन्त्रिमुख्याः महान्तम् आनन्दम् अवापुः ।

नरवाहनदत्तः मानसवेगमन्दरदेवौ स्वस्वराज्ये प्रत्यतिष्ठिपत् । एवं सर्वेषु बन्धुमित्रोदासीनेषु दर्शितादरः नरवाहनदत्तः तदा तदा आकाशवाण्या प्रकाशीकृतप्रभावतया, भगवतः भवानीपतेः सकाशात् अधिगतापूर्वैश्वर्यतया बहुभिः विद्याधरकन्यकाभिः स्वयंवृततयाच, 'नमानुषः अपितु विद्याधरकुमार एव, इति निश्चित्य सर्वैः विद्याधरैः सस्नेहबहुमानम् अभिनन्दितो बभूव ।

अथ भगवान् नारदः समागत्य नरवाहनदत्तम् एवम् उवाच । अस्ति अकंपनो नाम विद्याधरराजर्षिः । सः मन्दरदेवस्य जनकः । सः इदानीम् कानने तपश्चरति । तं प्रणामपूर्वकम् उपसर्प । सः भवतः विद्याधरराज्याभिषेकस्य समुचितानि संविधानानि विधास्यति; इति ।

तत् श्रुत्वा नरवाहनदत्तः तथेति अभ्युपगम्य, सद्यः एव प्रस्थाय तपोवने तपः चरन्तम् अकम्पनं राजर्षिम् उपसृत्य स्वनामोच्चारणपूर्वकम् ववन्दे । स तु ज्ञानदृष्ट्या सर्वं विज्ञाय, आत्मनः दुहितरं मन्दरदेवीं नाम कन्यकां नरवाहनदत्ताय समर्प्य, तयोः विवाहं यथाविधि निर्वर्तयामास ।

अथ ऋषभगिरौ महाभिषेकः निर्वर्तनीयः, इति विद्याधरान् आज्ञापयामास। अथ सर्वे विद्याधराः स्वस्वविभवानुगुणानि संविधानानि संपादयामासुः। अथ नरवाहनदत्तः सर्वैः सुहृद्भिः परिवृतः कळत्रवर्गेण मन्त्रिगणेन विद्याधरसङ्घैश्च समं प्रस्थाय, ऋषभगिरिम् आससाद । तत्र पुरोधसौ वैश्वानरशान्तिसौमौ दूरीकृतावद्यगन्धं शुभतरं मुहूर्तं निर्धारयामासतुः ।

अथ नरवाहनदत्तस्य बह्वीषु भार्यासु का वा सीमन्तिनी पट्टमहिषीपदम् अर्हति ? इति विचारः समजायत । तदानीम् 'रतिदेव्याः अंशेन अवतीर्णा मदनमञ्चुकैव प्रधानमहिषीपदे अभिषेक्तव्या' इति अशरीरिणी वाक् आविरभूत् ।

तत् श्रुत्वा सर्वे विस्मिताः बभूवुः । अथ संप्राप्ते महाभिषेकमुहूर्ते विद्याधराः मङ्गळतूर्याणि अवादयन् । अप्सरसः स्तुतिसुभगानि मङ्गळगीतानि जगुः । ब्राह्मणाः स्वस्तिवाचनानि पेठुः । कल्पवृक्षाः पुष्पाणि ववृषुः । विद्याधरवृद्धाः मङ्गळाशासनानि अकार्षुः । एवं विधेषु कल्याणकोलाहलेषु समुपक्रान्तेषु प्रयतौ पुरोधसौ बहुभिः महर्षिभिः सहितौ मदनमञ्चुकासहितं नरवाहनदत्तं रत्नमये सिंहासने समुपवेशयामासतुः ।

अथ सर्वे महामुनयः सर्वतीर्थेभ्यः समाहृतेन सुवर्णकलशपूरितेन परिपूतेन सुगन्धिना सलिलेन नरवाहनदत्तम् अभ्यषिञ्चन् । तत्पार्श्वे

समुपविष्टा मदनमञ्चुका सहस्राक्षस्य समीपे पुलोमजेव आबभौ । एवं भगवतः महेश्वरस्य अनुग्रहेण निस्सपत्नम् सर्वविद्याधराधिपत्यम् अवाप्य मर्त्यलोकदुर्लभान् भोगान् अनुभवन्तम् नरवाहनदत्तम् अभिवीक्ष्य वासवदत्तावत्सराजौ परां कोटिम् आनन्दस्य अध्यगच्छताम् ।

इति श्रीमदुदयनचरितं समाप्तम्,

अनन्ताचार्यनामासौ
नल्लानभिजनः सुधीः ।
जग्रन्थोदयनोदन्तम्
संक्षिप्तं विदुषां मुदे॥

श्रीकृष्णार्पणमस्तु ।



हिन्दू प्रचार प्रेस्, ट्रिप्लिकेन्. मद्रास्